द्वौ वर्गौ तु द्वृचौ ज्ञेयौ ऋक्त्रयस्य[1] शतं स्मृतम् ॥ २ ॥
चतुर्ऋचां[2] पंचसप्तत्यधिकं च शतं तथा ॥
पंचऋचां[3] तु द्विशतं सहस्रं रुद्रसंख्यया ॥ ३ ॥
पंचचत्वार्यधिकं[4] तु षड्ृचां च शतत्रयम् ॥
सप्तर्चस्य शतं ज्ञेयं विंशतिश्चाधिका स्मृता ॥ ४ ॥
अष्टऋचां तु पंचाशत्पंचाधिकास्तथैव च ।
दशाधिकद्विसहस्राः पंचशाखा सुनिश्चिताः ॥ ५ ॥
वर्गाः संज्ञानसूक्तस्य चत्वारश्चात्रमीलिताः ।
एवं पारायणे प्रोक्ता ऋचां संख्येन न्यूनतः ॥ ६ ॥

---

१ न्यूनं तृचशतं स्मृतं २ चतुष्कं शतमेकं च चत्वारः सप्ततिस्तथा ३ पञ्चकानां द्वे सहस्रं तु द्वेसप्तोत्तरेशते ४ शतमूनविंशतिः (११९) सप्तकानां न्यूनाषष्टिरष्टकानां (५९) त्रीणि शतानि षट्कानां चत्वारिंशत्षट्चवर्गाः (३४६) ऋग्वेदसंहिता- सातवळेकरप्रथमावृत्ति पान- ८२८.

२. चरणव्यूहः (यजुर्वेदखण्डः)

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति तत्र चरकानां द्वादशभेदा भवन्ति तत्र चरका आव्हरका कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्तान्तवेया[1] श्वेताश्वततरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति। तत्र मैत्रायणीयानां षड्भेदा[2] भवन्ति मानवा वाराहा दुंदुभाश्छागलेया हारिद्रवेयाः श्यामायनीयाश्चेति। तेषामध्ययनमष्टौशतं यजुः सहस्राण्यधीत्य शाखापारो भवति। तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारोभवति षडंगान्यधीत्य षडंगवित् भवति। (तत्र षडंगानि) शिक्षाकल्पो व्याकरणं निरुक्तंछंदोज्योतिषमिति षडंगानि। तत्र प्राच्योदीच्यनैर्ऋत्यांवाजसेनयानां पंचदशभेदा भवन्ति। काण्वा[3] माध्यंदिना श्यावीया स्थापायनीया कापालाः पौण्ड्रवत्सा

पाठभेदाः १ वार्तांतरेया २ सप्तभेदाः मानवा दुंदुभाश्चैकेया वाराहा हारिद्रवेया श्यामा श्यामायनीयाश्चेति ना. प्रत. ३ जबाला बौद्धायना काण्वा माध्यंदिनेयाः शाफेयास्तापनीयाः केपालाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया अद्धा बौधेयाश्चेति. चौ. प्र.

आवटिका परमावटिका पाराशर्या वैधेया वैनेया औधेया गालवा बैजवा कात्यायनीयाश्चेति। प्रतिपद मनुपद छंदो भाषाधर्मो मीमांसा न्यायस्तर्क इत्युपांगानि। यूपलक्षणं[1] छागलक्षणं प्रतिज्ञा-नुवाकसंख्या चरणव्यूहश्राद्धकल्पशुल्बकानि पार्षदमृग्यजूंषीष्ट-कापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसंख्यानिगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणनित्यष्टादश परिशिष्टानि भवन्ति। द्वे सहस्रे शते न्यूने मंत्रे वाजसनेयके। ऋग्गणः परिसंख्यातमेतत्सर्वं-सशुक्रियम्॥ ब्राह्मणं च चतुर्गुणं॥ तत्र तैत्तिरीयकानां द्विभेदा-भवन्ति औख्याकांडिकेयाश्चेति। कांडिकेयानां पंचभेदा[2] भवन्ति आपस्तंबी[3] बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तत्र कठानां उपगायतु चतुश्चत्वारिंशदुपग्रंथाः। मंत्रब्राह्मणयोर्वेदस्त्रि-गुणं यत्र पठ्यते। यजुर्वेदः स विज्ञयो अन्ये शाखांतराः स्मृताः। तेषामध्ययनं प्रवचनीयाश्चेति॥ २॥

---

१ उपज्योतिषं सांगलक्षणं प्रतिज्ञानुवाकं परिसंख्या चरणव्यूहः श्राद्धकल्पः प्रवराध्यायश्च शास्त्रक्रतुसंख्यानुगमयज्ञपार्श्वानि हौत्रिकं पशवो-क्थानि कूर्मलक्षणं २ औखेया खांडिकेयाश्चेति ३ कालेता श्याट्यायनी हैरण्यकेशी भारद्वाजी आपस्तंबी चेति. चौ. प्रत.

३. चरणव्यूहः (सामवेदखण्डः)

सामवेदस्य किल सहस्रभेद आसीदनध्यायेष्वधीयानास्ते शक्रेणाभिहताः प्रनष्टाः शेषान्प्रवक्ष्यामि असुरायणीया वासुरायणीया वार्तांतरेयाः प्रांजलऋग्वैनविधा प्राचीनयोग्या राणायणीयाश्चेति । राणायनीयानां नवभेदा भवन्ति-राणायनीयाःशाठ्यायनीयाःसात्यमुद्गलाः खल्वला महाखल्वला लांगलाः कौथुमा गौतमा जैमिनीयाश्चेति । (प्रकारान्तरं)राणायणीयानां सप्तभेदा भवन्ति राणायनीयाः सात्यमुग्राः कालेया महाकालेया लांगलायनाः शार्दूला कौथुमाश्चेति । तत्र कौथुमानां षड्भेदा भवंति कौथुमा आसुरायणा वातायनाः प्रांजलिद्वैनभृतः प्राचीनयोग्या नैगमीया इति तेषामध्ययनम् । अशीति शतमाग्नेयं पावमानं चतुःशतं ॥ ऐंद्रं तु षड्विंशतिर्यानि गायन्ति सामगाः । तान्यधीत्य चण्डात् प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाविंशतिको भवति । तत्र केचित् पुनरुक्तंतंत्रं सामतंत्रं संज्ञालक्षणं धातुलक्षणमिति विधीयन्ते ।

पाठभेदाः ओळ १ शतक्रतु वज्रेणा० चौ. प्रत. ओळ ९ प्रकारांतरेण वर्णितो भागः चौखम्बामुद्रितपुस्तके मूले विद्यते इतरत्र पुस्तके नास्ति परं भाष्ये तस्य व्याख्यान कृतं इति कृत्वा मूले पाठार्थं उध्दृतः ओळ

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
अष्टौ शतानि नवति दशतिर्वालखिल्यकम् ॥ १
सरहस्यं ससुपर्णं प्रेक्ष्यस्तत्रवालखिल्याः ।
सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम् ॥ २

---

१४ अष्टौ सामसहस्राणि छंदोगार्चिकसंहिता। गानानि तस्य वक्ष्यामि सहस्राणि चतुर्दश। अष्टौशतानि ज्ञेयानि दशोत्तरस्तथैव च । ना. प्र.

४. चरणव्यूहः (अथर्ववेदखण्डः)

अथर्ववेदस्य नवभेदा भवन्ति पैप्पला दान्ता प्रदान्ता औता जाबाला शौनका ब्रह्मपलाशा कुनखीवेददर्शी चारणविद्याश्चेति । तेषामध्ययनं पंचकल्पा भवंति । द्वादशैव सहस्राणि पंचकल्पानि भवंति कल्पे कल्पे पंचशतानि भवंति । नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिताकल्पः शांतिकल्पश्चेति । सर्वेषामेव वेदानामुपवेदाभवन्ति । ऋग्वेदस्यायुर्वेदउपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गांधर्ववेद उपवेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान् व्यासः स्कंदो वा । य इमे वेदाश्चत्वारस्तेषां एकैकस्य कीदृशं रूपं वर्ण विधोच्यते । ऋग्वेदः पद्मपत्रायताक्षः । सुविभक्तग्रीवः । कुंचितकेशश्मश्रुः श्वेतवर्णोवर्णेन कीर्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पंच यजुर्वेदः पिंगाक्षः कृशमध्यस्थूलगलकपोलः । ताम्रवर्णः कृष्णवर्णो वा । प्रादेशमात्रः षड्दीर्घत्वेन सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयनः कांचननयनो वा आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डः कामरूपी विश्वकर्ता क्षुद्रकर्मा स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णोवर्णेन दशारत्निमात्र ऋग्वेदस्यात्रिगोत्रं सोमदैवत्यं गायत्री छंदो यजुर्वेदस्य काश्यपगोत्रं इंद्रदैवत्यं त्रिष्टुप् छंदः । सामवेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं जगतीछंदोऽथर्ववेदस्य बैजानगोत्रं ब्रह्मदैवत्यं अनुष्टुप् छंदः ॥ ४ ॥

टीपः— अस्मिन् चरणव्यूहग्रंथे भाष्यानुसारेण प्रतिखण्डे पाठो गृहीतः

५ चरणव्यूहः (पञ्चमः खण्डः)

॥ फलश्रुतिः ॥

य इदं वेदानां नामरूपगोत्रप्रमाणछंदोदैवतवर्णं वर्णयति। अविद्यो लभते विद्यां जातिस्मरोऽथ जायते जन्मजन्मवेदपारगो भवति अव्रती व्रती भवति। अब्रह्मचारी ब्रह्मचारी भवति। नमः शौनकाय नमः शौनकाय ॥

य इदं चरणव्यूहं गर्भिणीं श्रावयेत्स्त्रियम् ॥
पुमांसं जायते पुत्रमृषिभिर्वेदपारगम् ॥ १ ॥
य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः।
अक्षय्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते ॥ २ ॥
य इदं चरणव्यूहं पठेत्स पंक्तिपावनः।
तारयेत् प्रभृतीन्पुत्रान् पुरुषान्सप्त सप्त च ॥ ३ ॥
य इदं चरणव्यूहं पठेत्पर्वसु पर्वसु।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय गच्छति ॥ ४ ॥
यो नामानि पुरा वेद अमृतत्वं च गच्छति।
लोकातीतं महाशान्तममृतत्वं च गच्छति

ॐ नम इत्याह भगवान् पाराशर्यः। ॐनमः परमऋषिभ्यो नमः॥

तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्माम्बरं सुरमुनींद्रनुतं कवींद्रम्।
कृष्णात्विषं कनकपिंगजटाकलापम्।
व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥ ५ ॥

॥ इति चरणव्यूहमूलं समाप्तम् ॥

श्रीचरणव्यूहभाष्यं भाषान्तरञ्च

ऋग्वेदवर्णनम्

प्रथमखण्डः

श्रीगणेशाय नमः ॥
श्रीसरस्वत्यै नमः ॥
श्रीकुलदेवतारेणुकायै नमः ॥
श्रीगुरुभ्यो नमः ॥

श्रीगणेशं शारदां च रेणुकां कुलदेवताम् ।
विद्यागुरुं च पितरौ वासुदेवसरस्वतीम् ॥ १ ॥
मम साहाय्यकर्तारं वासुदेवाख्यशास्त्रिणम् ।
एतान् सर्वान् प्रणम्यादौ चरणव्यूहविवृतिम् ॥ २ ॥
अयाचितोपनामाहं दासो राजेश्वरात्मजः ।
महीदासकृतं भाष्यं प्रातिशाख्यं विलोक्य च ॥ ३ ॥
सामान्यजनबोधार्थं कुर्वे लौकिकभाषया ।

भाष्यकारकृतमंगलाचरणश्लोकप्रारंभः ॥

ॐमित्येकाक्षरं ब्रह्म नादबिन्दुकलान्वितम्[२] ।
त्रिदेवं त्रिमात्रं च स्फुटं विष्णुं सनातनम् ॥ १ ॥
तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ।
वन्दे नारायणं देवं निरवद्यं निरंजनम् ॥ २ ॥

---

२ कलात्मकम्.

कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ।
येन चरणव्यूहेषु शाखाभेदंमितं कृतम् ॥ ३ ॥
तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम् ।
नत्वा तु शाकलाचार्यं तथैव चाश्वलायनम् ॥ ४ ॥
एवं परम्पराप्राप्तं बाळकृष्णं महागुरुम् ।
यस्य प्रसादात् व्याख्यामि चरणव्यूहसंज्ञकम् ॥ ५ ॥

अर्थः— नादबिन्दुकलारूपी ज्याच्या तीन माला (अ + उ + म्) व तीन देवता आहेत असें जें एकाक्षर ॐ ज्याला सनातन व्यापक ब्रह्म म्हणतात त्या जगदाधार, सर्वज्ञ, निर्लेप, स्वयंप्रकाश व समर्थ अशा परमात्म्याला आणि ज्यानें चतुष्पाद असलेल्या वेदांच्या शाखेच्या भेदांचें परिमाण (मापन) केलें, त्या वेदमहानिधि व्यासाला व व्यासशिष्य लोकप्रसिद्ध वेदज्ञ शौनकगुरु, शाकलाचार्य व आश्वलायनऋषि आणि त्याच परंपरेंतील माझे (महीदासाचे) गुरु बाळकृष्ण ह्यांना नमन करून, त्यांच्याच कृपेनें, मी चरणव्यूहग्रन्थाचें व्याख्यान करतों.

मूलसूत्रम्ः—अथातश्चरणव्यूहं व्याख्यास्यामः ॥ १ ॥

भाष्यः—अथ शब्दो मंगले प्रस्तावे च । अथशब्दः पूर्वमेव मंगलार्थ इत्यर्थः अतः शब्दः हेत्वर्थः । चरणव्यूहः वेदराशेश्चतुर्विभागात् चरण उच्यते । तस्य व्यूहः समुदायः चतुर्वेदानां समुदायः तं व्याख्यास्याम इत्यर्थः ॥ कथमेकवेदः ? तदुक्तम् आरण्यके " सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः, प्राण एव प्राण ऋच इत्येव विद्यात् " (ऐ. अरण्यक २ खण्ड १०) इति तस्य चतुर्विभागाः

अर्थः— सूत्रारंभीं असलेल्या "अथ" शब्दाचे दोन अर्थ; १ मंगल व २ आरंभ. त्यापैकीं पहिलाच अर्थ म्हणजे मंगलार्थ समजावा. अतः म्हणजे म्हणून–वेदशाखांचा विस्तार श्रवण केल्यानें सर्व पातकांचा नाश होतो

पा. भे. १ वेद १ " सर्वेवेदा " यावरील विस्तृत टीप पान ४ वर मंत्रभाष्य लिहिलें आहे तेथें पाहावी.

कृताः। तथा चोक्तम् द्वादशस्कन्धे षष्ठाध्याये भागवते— "तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः। सव्याहृतिकान् सोंकारांश्चातुर्होत्रविचक्षणैः ॥ ४४ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षिर्ब्रह्मकोविदान्। ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः। चतुर्युगेष्वथ व्यस्ता द्वापरादौमहर्षिभिः ॥४६॥ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः। वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ॥४७॥ अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः। ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः। अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्। ॥ ४९॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥५०॥ तासां स चतुरः शिष्यानुपाहूय महामतिः। एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः॥५१॥ पैलाय संहितामाद्यां बव्हृचाख्यामुवाच ह। वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥ ५२ ॥ साम्नां जैमिनये प्राह, तथा छन्दोगसंहिताम्। अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ ५३ ॥ पैलः स्वां संहितामूच इंद्रप्रमितये मुनिः। बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ५४ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गवे। पराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ॥ ५५ ॥ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविम्। तस्य शिष्यो वेदमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ (इंद्रप्रमितिसुतो माण्डूकेयः माण्डूकेयसुतः शाकल्यः शाकल्यशिष्यः वेदमित्रः) शाकल्यस्तत्सुतः स्वां तु

म्हणून—आम्ही चरणव्यूहाचें व्याख्यान करतों. चरण म्हणजे वेद. कारण पूर्वी वेदराशि एक असून ऋगादि—मिश्रित चतुष्पाद होता म्हणून प्रत्येक वेदाला चरण ही संज्ञा प्राप्त झाली आहे. आतां चरणांचा म्हणजे वेदांचा व्यूह म्हणजे समुदाय होय. आतां एक वेद कसा ? असें म्हणाल तर ऐतरेय दुसरें आरण्यक खण्ड १० मध्यें सर्व वेद सर्व घोष (नाद) एकच, व्याहृति तीं प्राण, प्राणच ऋचा जाणावी असें वर्णन आहे; म्हणजे एक व्याहृतिरूप

पञ्चधा व्यस्य संहिताम् । वात्समुद्गुलशालीयगोखल्यशिशिरेष्व-
धात् ॥ ५७॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रति
शाखाभ्यो वालखिल्याख्यसंहिताम् । चक्रे बालाय निर्भज्य कासा-
रश्चैव तां दधुः ॥ ५९ ॥ बव्हृचाः ह्येता एभिर्ब्रह्मर्षिभिर्धृताः । श्रुत्वै-
तच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६०॥ भागवत—स्कंध १२अ.६

भाष्यः—अस्यार्थः व्यासात्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा इंद्रप्रमितये ददौ इन्द्रप्रातिश्चतुर्धा जटान्तं व्यासं कृत्वा बाष्कलादिअग्निमित्रान्तषट्शिष्येभ्यः स्वसुताय माण्डूकेयाय च ददौ। माण्डूकेयशिष्यः वेदमित्रः तस्य पुत्रेभ्यः सौभर्यादिभ्यस्तैः स्वसुताय शाकल्याय ददौ ॥ शाकल्यः संहितापदक्रमजटादण्डरूपं पंचधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोखल्यशिशिरेभ्यः ददौ शाकल्यशिष्यः जातूकर्ण्यः सनिरुक्तां संहितां बलाकपैजवैतालविरजेभ्यः ददौ। पूर्वोक्तबाष्कलपुत्रो बाष्कलिः पूर्वोक्तसर्वशाखाभ्यः उद्धृत्य वालखिल्यसंहितां चक्रे ॥ तां वालखिल्यसंहितां बालायनिप्रभृतयोऽधीतवन्तः इति पदेषु संहितात्वमितिकरणं वेष्टनं उदात्तनुदात्तस्वरितस्वराणां संधिः। एतत् छन्दसां व्यासं विस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः।

वेदाची प्राण म्हणून उपासना करावी असें विधान केलें आहे. त्या एका वेदाचे चार विभाग व्यासानें केले. हें श्रीमद्भागवत द्वादशस्कन्ध षष्ठाध्याय श्लोक ४४ ते ६० यांत सांगितलें आहे. तें असें:—

१ **मंत्रभाष्य** :— अग्निमीळे पुरोहितमित्यारभ्य 'यथावः सुसहासति' इत्यन्ताः समाम्नाता ऋचो याः सन्ति ता एता सर्वाः अप्येकैव व्याहृतिरेकशब्दात्मिकाः " तथा च ऋग्वेंदयजुर्वेदादयो सन्ति ये च घोषा (झ, भ, घ, ढ, धादयो) घोषयुक्तवर्णाः सन्ति ते एकैव व्याहृतिः। कोऽसौ एकशब्द इति स उच्यते, प्राण एव शब्देन सर्वशब्दजातमग्रहीत् प्राणशक्त्यैव

सर्वेषामुच्चार्यमाणतयाप्राणेऽन्तर्भावात् ॥ तस्मात् प्राण ऋगुपलक्षितं सर्व-शब्दजातं महर्षिजातं च प्राणस्वरूपमित्येव उपसितव्यम् ।

अर्थः— (ह्या श्लोकांच्या पूर्वीच्या श्लोकांत ब्रह्मदेवानें ओंकारापासून अक्षरसमाम्नाय निर्माण केला असें वर्णन आहे.) त्या अक्षरसमाम्नायाच्या साह्यानें भगवान् ब्रह्मदेवानें आपल्या चारही पुत्रांना चार मुखांनीं चार वेद व्याहृति व ओंकारसहित पढविले. ते पढविण्यांत ब्रह्मदेवाचा हेतु असा कीं, चार वेदांच्या चार ऋत्विजांकडून होणाऱ्या यज्ञाचें अनुष्ठान योग्य व्हावें. त्याचे पुत्र ब्रह्मज्ञानी ऋषीच होते. पुढें ते धर्मोपदेशक होऊन त्यांनीं आपल्या पुत्रांना त्या वेदांचा उपदेश दिला. ४४ ते ४५. अशा परंपरेनें चारी युगांत शिक्षणाचें व्रत घेतलेल्या शिष्यांनीं ते मिळविले. नंतर द्वापारयुगारंभीं त्या महर्षींनीं निराळी व्यवस्था केली. ४६. कालमहात्म्यामुळें लोक अल्पायुषी, अल्पबल व अल्पबुद्धि झालेले पाहून महर्षींच्या मनांत अन्तर्यामीरूपानें असणाऱ्या परमेश्वरानें प्रेरणा केली. त्या प्रेरणेनुसार ब्रह्मर्षींनीं वेदाचे विभाग केले. ४७. हे शौनकमुने, या वैवस्वत-मन्वंतरांत ब्रह्मदेव, शंकर इत्यादिक देवांनीं व इंद्रादि लोकपालांनीं लोकरक्षक भगवंताची धर्मरक्षणार्थ प्रार्थना केली. ४८. हे भाग्यशालि मुने, त्या विनंतीप्रमाणें परमेश्वरानें स्वतःच्या अल्पांशानें पराशर मुनीचा पुत्र म्हणून सत्यवतीच्या उदरीं अवतार घेतला व एका वेदाचे चार विभाग केले. ४९. रत्नांच्या राशींतून निरनिराळ्या जातींचीं रत्नें वेगवेगळीं करून त्यांचे वर्ग बनवावे त्याप्रमाणें ऋक्, यजु, साम अशा विविध प्रकारच्या मंत्रांनीं भरलेल्या वेदराशींतून व्यासानें निरनिराळ्या प्रकारचे मंत्र वेगळे करून चार (४) संहिता केल्या. ५०. हे शौनका, मग त्या विशालबुद्धि व समर्थ व्यासानें आपल्या चार शिष्यांना बोलावून चार संहितांपैकीं एकेक संहिता एकेकाला पढविली. ५१.

पा. भे. २ विवक्षया

भाष्यः— तथा च विष्णुपुराणे-ब्रह्मणा चोदितो व्यासो वेदान्व्यस्तुं प्रचक्रमे। अथ शिष्यान् स जग्राह चतुरो वेदपारगान् ॥ १ ॥ ऋग्वेदश्रावकं पैलं सञ्जग्राह महामतिः। वैशंपायननामानं यजुर्वेदस्य चाग्रहीत् ॥ २ ॥ जैमिनिः सामवेदस्य तथैवाथर्ववेदवित्। सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः ॥ ३ ॥

पहिली ‘ बव्हृच ’ किंवा ऋग्वेदसंहिता ही त्यानें पैलनामक शिष्याला, दुसरी यजुर्मन्त्रांची ‘ निगद ’ नांवाची संहिता वैशंपायनाला, तिसरी साममंत्रांची ‘ छंदोग ’ संहिता जैमिनीला व सुमन्तुनामक शिष्याला चवथी ‘ आंगीरसी’ नांवाची अथर्वसंहिता पढविली. ५३. (येथपर्यंतच्या भागवतश्लोकांचा अर्थ भाष्यकारानें दिला नाहीं. त्यामुळें आम्हीं त्या श्लोकांचें वरील भाषान्तर दिलें आहे.)

अर्थः— श्लोक ५४ पासून ६० पर्यंत मूळाप्रमाणें अर्थ न देतां महीदासानें “ अस्यार्थः ” असे शब्द देऊन जें विवरण केलें आहे तें असेंः— व्यासापासून पैलमुनीनें संहितापदक्रमरूप तिविध वेद शिकून इंद्रप्रमितीस दिला. त्यानें त्याचे चार प्रकार करून म्हणजे पूर्वींच्या अध्ययनांत जटाविकृतीची भर घालून बाष्कल, बोध्य, याज्ञवल्क्य, पराशर, अग्निमित्र या शिष्यांना व आपला पुत्र मांडूकेय अशा सहा जणांना शिकविला. मांडूकेयशिष्य वेदमित्र यानें इंद्रप्रमितीच्या सौभर्यादि पुत्रांना आणि शाकल्य नांवाच्या आपल्या मुलास तोच वेद पढविला. शाकल्यानें पांच प्रकार करून म्हणजे दण्डविकृतीची भर घालून वात्स्य, मुद्गल, शालीय, गोखल्य व शिशिर यांना तो शिकविला. शाकल्यशिष्य जातुकर्ण्य यानें निरुक्तासह संहिता, बलाक, पैंग्य, वेताल व विरज या शिष्यांना सांगितली. पैलशिष्य जो बाष्कल त्याचा पुत्र बाष्कलि. यानें पूर्वीं सांगितलेल्या सर्व शाखांतून, निराळे मन्त्र काढून **वालखिल्यसंहिता रचली.** त्या संहितेचें

चालायनि, भव्य, काशीर इत्यादिक शिष्यांनीं अध्ययन केलें. पदामध्यें इतिकरण (पदपाठांत जेथें पदाला इति शब्द जोडलेला असतो तें) वेष्टन[1] व उदात्त, अनुदात्त व स्वरित स्वरांचा संधि ह्यांना संहितात्वच आहे. अशा प्रकारचा वेदविस्तार श्रवण करून मनुष्य सर्व पापापासून मुक्त होतो.

मागें भागवतश्लोकांत वर्णिल्याप्रमाणें विष्णुपुराणांतही सांगितलें आहे. ब्रह्मदेवानें प्रेरित केलेल्या व्यासानें वेदविभाग करण्यास आरंभ केला व वेदपारग चार शिष्य मिळविले. ऋग्वेदाध्येता पैल, यजुर्वेदाध्ययनकर्ता वैशंपायन, सामवेदाध्येता जैमिनि व अथर्ववेत्ता सुमन्तु.

भाष्यः— तथा च गृह्यसूत्रं "सुमन्तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या" (आ. गृ. सू. आ. ३ खंड ४) इति जानंति बाहवी इत्यारभ्य माण्डूकेया इत्यन्तं माण्डूकगणसमुदायः। गर्गी वाचक्नवी इत्यारभ्य शांखायनमित्यन्तं शांखायनगणः। एतेषां कौषीतकिब्राह्मणं आरण्यकं शांखायनसूत्रं च। ऐतरेयम् इत्यारभ्य आश्वलायनमित्यन्ता आश्वलायनगणः एतेषां ऐतरेय ब्राह्मणं आरण्यकं आश्वलायनसूत्रं चेत्यर्थः।

मूलसूत्रः—तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवन्ति।

भाष्यः—अस्मिन् ग्रन्थे यदुक्तं चातुर्वेद्यं तेन चत्वारो वेदा विज्ञाता भवन्ति।

मूलसूत्रः—तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति।

भाष्यः—इति स्पष्टार्थः "वेदा हि यज्ञार्थमभिप्रवृत्ताः" लगधज्यो. खण्ड ७

---

१. क्रमाचे वेळीं इतिकरण असलेलें व दुःखंड असलेलें पद किंवा अर्धर्चेच्या अन्तीं असलेलें पद पुनः इति लावून म्हणतात तें वेष्टन होय.

(भाष्य:—विष्णुपुराणे- आद्यो वेदश्चतुष्पादः शतसाहस्र-संमितः। ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥ अत्रैवं मत्सुतो व्यासः अष्टाविंशतितमेंऽतरे। वेदमेकं चतुष्पादश्चतुर्धा व्यभजत् प्रभुः ॥ २ ॥ अस्यार्थः— आद्यो वेदो वेदविभागात्पूर्व-कालीनो वेदश्चतुष्पादः ऋगादिचतुष्टयरूपः शतसाहस्रसंमितः "दश[१] दश तच्छतं दशशतानि तत्सहस्रं तत्सर्वं" इति श्रुतेः। 'अनन्त-संख्याकः "अनन्ता वै वेदाः" ततो वेदात्प्रवृत्तः कृत्स्नोऽयं दशगुणः दशविधः "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दशपूर्णमासौ चातु-र्मास्यानि पशुः सोमः "(ऐ. आ. २ खण्ड १५.) इति श्रुतेः।

अर्थः— वरीलप्रमाणें आश्वलायनगृह्यसूत्रांतही यांच्याच नांवाचा उल्लेख आहे. त्यांत अधिक खुलासा एवढाच कीं, जानन्ति बाहवीनांवा-पासून माण्डूकेयनांवापर्यंत माण्डूकशाखागण व गर्गी वाचक्नवी येथपासून शांखायननांवापर्यंत शांखायनगण, त्यांचे अध्ययनग्रन्थ कौषितक ब्राह्मण व त्याच नांवाचे आरण्यक व शांखायनसूत्र हे होत. ऐतरेययेथपासून आश्वलायनापर्यंत आश्वलायन गण त्यांचे अध्ययनग्रन्थ ऐतरेय ब्राह्मण व आरण्यक आणि आश्वलायनसूत्र हे होत.

या ग्रंथांत चातुर्वेद्य म्हणजे चारच वेद जे सांगितले आहेत त्या योगानें चार वेद पूर्ण ज्ञात होतात. चातुर्वेद्य शब्दाची व्युत्पत्तिः-**चत्वरः वेदा एव चातुर्वेद्यं (चतुर्वर्णादीनां स्वार्थ उपसंख्यानम् स्वार्थेष्यञ्)**

अर्थः— (५ । १ । १२४) वेदांची म्हणजे वेदविभागांची प्रवृत्ति यज्ञासाठीं आहे, असें लगधकृत वेदांगज्योतिष्यांत सांगितलें आहे.

भाष्यः— (तथा च पञ्च वा एते महायज्ञा इत्युपक्रम)

"ब्रह्मयज्ञो, देवयज्ञः, पितृयज्ञो, भूतयज्ञो, मनुष्ययज्ञ" इति

---

१ अत्रान्तरे (पाठभेद)२—१० दशक म्ह. शंभर. १० शंभर. म्ह. सहस्र. सहस्र म्ह. सर्व अनन्त.

श्रुतेश्च । वैतानिका गार्ह्याश्च दशयज्ञाः । अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविंशतितमे द्वापरयुगे इति शेषः । मत्सुतो व्यासः कृष्णद्वैपायनश्चतुर्धा व्यभजत् (ऋगादिरूपेण चतुर्धा विभक्तवान्)) १

भाष्यार्थः-- विष्णुपुराणांत पराशराचेंही पुढील वचन आहे. तें असें:— वेदविभाग होण्यापूर्वी प्रथम वेद चतुष्पाद् म्हणजे ऋग्वेदादि चार मन्त्रांचा समूह होता, तो शतसाहस्र म्हणजे अनंत होता " अनंता वै वेदाः" अशी श्रुतीच आहे. त्या वेदापासून १० प्रकारचा संपूर्ण यज्ञ निर्माण झाला. त्यांमध्यें ५ (पांच) श्रौतयज्ञ व तसेच पांच (५) स्मार्तयज्ञ. श्रौतयज्ञांचीं नांवें. १ अग्निहोत्र, २ दर्शपूर्णमास, ३ चातुर्मास्य, ४ पशु आणि ५ सोम. स्मार्तयज्ञांचीं नांवें. १ ब्रह्मयज्ञ, २ देवयज्ञ, ३ पितृयज्ञ, ४ भूतयज्ञ व ५ मनुष्ययज्ञ. असे मिळून १० आहेत. या वैवस्वतमन्वन्तरांतील अठाविसाव्या युगांत माझा पुत्र कृष्णद्वैपायनव्यास यानें त्या वेदाचे ऋक्, यजु, साम, अथर्व असे संहितारूपी चार विभाग केले.

भाष्यः— ते यज्ञा द्विविधाः अग्नौ हूयमाना अनग्नौ प्रहुताः । अग्नौ हूयमाना वैतानिकाः । अनग्नौ प्रहुताः नित्याभ्यासो ब्रह्मयज्ञः पारायणं च । अथ गृह्यसूत्रम् - यदृचोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वांगिरसः सोमाहुतिभिर्यद् ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोधीते पयसः कुल्या अस्य पितॄन् स्वधा उपक्षरन्ति (आ. गृ. सू. अं. ३ खण्ड ३)

भाष्यार्थः-- ते यज्ञ दोन प्रकारचे. अग्नीमध्यें हवन केले जाणारे वैतानिक म्हणजे श्रौतयज्ञ. अग्नींत हवन न होणारे प्रहुत म्हणजे नित्य वेदा-

१ अयं धनुश्चिन्हान्तर्गतभाष्यभागः चौखम्बामुद्रिते पुस्तके विद्यते उपयुक्त इति कृत्वा भाषान्तरे गृहीतः ।

ध्ययन, ब्रह्मयज्ञ व पारायण हे होत. वेदाध्ययनाला यज्ञ म्हणण्याचें कारण 'यहचोधीते...स्वधाउपक्षरंति' या वचनांत जो पुरुष वेदांच अध्ययन करतो, तें त्याचें अध्ययन दुग्धाहुतीप्रमाणें देवतांची तृप्ति करतें. यजुर्वेदाचें पठन घृताहुतीप्रमाणें, सामाचें अध्ययन मधाच्या आहुतीप्रमाणें, अथर्ववेदाचें अध्ययन सोमाहुतीप्रमाणें, ब्राह्मण, कल्प, गाथा, नाराशंसी इतिहास व पुराण अमृताहुतीप्रमाणें देवांना संतुष्ट करतें, असें वर्णन करून या अध्ययनानें पितरांचीहि तृप्ति होते असें सांगतात. ऋक् मन्त्रांचें पठन यजमानाच्या पितरांस दुधाच्यां नद्यांच्या रूपानें पित्रन्न बनून प्राप्त होतें. यजुःपठन तुपाच्या नद्या, सामाध्ययन मधाच्या नद्या, अथर्ववेदाध्ययन सोमाच्या नद्या, ब्राह्मण, कल्प इत्यादिकांचें अध्ययन अमृताच्या नद्यांच्या रूपानें पित्रन्न बनून पितरांची तृप्ति करतें. ॥ ३ ॥

मूलसूत्रः—तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति ॥ ४ ॥ अष्टभेदा इति पाठान्तरम् ।

भाष्यः— तत्र ऋग्वेदस्य अष्टभेदा भवन्ति १ शाकलबाष्कलौ २ ऐतरेयब्राह्मणारण्यकौ ३ सांख्यायनमाण्डुकौ ४ कौषीतकीयब्राह्मणारण्यकौ इत्यष्टभेदाः अन्ये अष्ट भेदाः वेदा विकृतिशाखाश्च भेदस्तु त्रिविधः स्मृतः । पृथक् नामाभिधानेन व्यासेन कथितं पुरा ॥ १ ॥ अष्टौ भेदेनाष्टस्थानेन वा विकृतिर्ग्राह्या विकृतीस्तु अग्रे वक्ष्यामः तस्मात् ब्रह्मयज्ञार्थें पारायणार्थें च ऋग्वेदस्य अध्ययनं कर्तव्यम् ॥ ४ ॥

भाष्यार्थः— ऋग्वेदाचीं स्थानें आठ आहेत. (पाठांतर आठ भेद आहेत असें आहे.) १ शाकल व बाष्कल या दोन संहिता. २ ऐतरेय ब्राह्मण व आरण्यक. ३ शांखायन व माण्डूकेय अशा दोन संहिता. ४ कौषीतकी ब्राह्मण व आरण्यक. पूर्वीं व्यासानें वेद, विकृति व शाखा असा त्रिविध

भेद पृथक् पृथक् म्ह. निरनिराळ्या प्रकारें सांगितला आहे. दुसरे कांहीं टीकाकार आठ भेद किंवा आठ स्थानें ह्या शब्दानें ' अष्टविकृति' घ्याव्या असें म्हणतात. या आठ विकृतींचीं लक्षणें पुढें सांगण्यांत येतील. त्रैवर्णिकानें ब्रह्मयज्ञासाठीं व पारायणाकरितां ऋग्वेदाचें अध्ययन करावें.

मूलसूत्रः— चर्चा श्रावकश्चर्चकः श्रवणीयपारः ॥ ५ ॥

भाष्यः— तदध्ययनं चतुष्पदेन वक्ष्यति ॥ चर्चा अध्ययनं तत्र पाणिनिसूत्रे चितिपूजि कथिकुम्बिचर्चश्च । एभ्यो अङ् स्त्रियां भावादौ । चिंतिं स्मृत्यां । पूजि पूजायां । कथि वाक्यप्रबंधे । कुबि आच्छादने । चर्च अध्ययने । चुरादय इति अष्टाध्यायीसूत्रोतालवोष्ठपुटव्यापारेण शब्दस्य श्रवणं क्रियते सा चर्चा । तदध्ययनस्य श्रावको गुरुः । तस्य चर्चकः शिष्यः श्रवणीयपारः श्रवणीयो वेदः तस्य पारः समाप्तिः । इति चतुष्पदेन अध्ययनं सूचितम् । अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति तत्पारायणं द्विविधम् । प्रकृतिविकृतिरूपम् । का प्रकृतिः । का विकृतिः । प्रकृतिः संहिता सा द्विविधा । रूढा योगा च ॥ रूढा यथा ' अग्निमीळे पुरोहितम् ' योगा यथा । अग्निमीळे ' इळेपुरोहितं ' इति प्रातिशाख्ये द्वितीय पटले भाष्यकारेण व्याख्यातम् ॥ ५ ॥

भाष्यार्थः—तें अध्ययन चार पदांनीं सांगतात. १ चर्चा, २ श्रावक, ३ चर्चक, ४ श्रवणीयपार चर्चाशब्दाची व्युत्पत्ति–पाणिनीच्या सूत्रांत चिन्त्–आटवणें, पूज्–पूजा करणें, कथ्–सांगणें, चर्च–अध्ययन करणें, कुब्–झांकणें, चर्च–अध्ययन करणें या धातूपासून स्त्रीलिंगांत स्वार्थी अङ् प्रत्यय होऊन चर्चा शब्द तयार झाला आहे. त्याचा अर्थ तालु व ओंठ या दोन स्थानांच्या क्रियेनें (म्हणजे गुरुमुखांतून) शब्दाचें श्रवण म्हणजे अध्ययन. श्रावक म्हणजे अध्ययन सांगणारा. चर्चक म्हणजे शिष्य. श्रवणीय म्हणजे ऐकण्यास योग्य असा वेद. त्याचा पार म्हणजे समाप्ति, म्हणजे श्रवणीयपार. या चार

पदांनीं अध्ययन सुचविलें आहे. (तात्पर्य, अध्ययन पूर्ण होण्यासाठीं गुरु, शिष्य, वेदाध्ययन व त्याची समाप्ति या चार साधनांची आवश्यकता आहे.) पुढील चार पदांनीं चार पारायणें सुचविलीं आहेत. पारायण दोन प्रकारचें. १ प्रकृतिपारायण. २ विकृतिपारायण. आतां प्रकृति कोणती व विकृति कोणती तें सांगतांत. प्रकृति म्हणजे संहिता. ती दोन प्रकारची. रूढा व योगा. रूढ किंवा आर्षीसंहितेचें उदाहरण ' अग्निमीळे पुरोहितम् ' यौगिक संहितेचें उदाहरण ' **अग्निमीळे । इळे पुरोहितम् । पुरोहितं यज्ञस्य पुरोहितमिति पुरःऽहितम् ।** असें ऋग्वेद प्रातिशाख्य द्वितीय पटलांत भाष्यकारानें[1] सांगितले आहे. इत्यर्थ.

मूलसूत्रः— क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति चतुष्पारायणम् ॥ ६ ॥

भाष्यः— अथ चतुष्पारायणं यथा । क्रमशब्द उभयसंहिता वाच्यः । स कथं । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत् क्रमम् । विलोमे पदवत्संधिरनुलोमे यथाक्रमम् । यथाक्रमं यथासंहिता इत्यर्थः अन्यच्च वर्णक्रमः ' अक्षरसमाम्नाय एव' इत्यारण्यके ' कथमभिष्टुयात् इत्यक्षरशः । चतुरक्षरशः । पच्छः । अर्धर्चशः । ऋक्शः । इति ऐ. ब्रा. पं. ६ खण्ड २ ब्राह्मणम् " भूयांसि तु समाम्नानात व्यंजनमात्रं तु तत्तस्याभिधानस्य भवति (निरु. उ. प. ६ अ. १ ख. १३) इति नैरुक्ताः क्रमशब्दः संहितावाची कथम् ' पदप्रकृतिः संहिता, नि. पू. ६ खं. १७) इति नैरुक्तवचनात्सा क्रमरूपा इत्यर्थः ॥

भाष्यार्थः— पारायण चार प्रकारचें. १ क्रमपार, २ क्रमपद, ३ क्रमजट, व ४ क्रमदण्ड क्रमशब्द दोन संहितांचा वाचक आहे. क्रमशब्दाचा संहिता हा

१. इकृश्तिपौ धातुनिर्देशे

अर्थ कसा म्हणाल तर व्याडीमहर्षीकृत जटापटलांत अनुलोम व विलोम किंवा व्युत्क्रम या रीतीनें दोन पदांचें त्रिवार पठन म्हणजेच जटासंज्ञक विकृति. ही विकृति म्हणतांना विलोमपठनाचे वेळीं पदाप्रमाणें संधि व अनुलोम म्हणण्याचे वेळीं ' यथाक्रम ' म्हणजे संहितेप्रमाणें संधि करावा असें वचन आहे. येथें यथाक्रम याचा अर्थ ' यथासंहिता ' असा केल्यामुळें क्रम म्हणजे संहिता. आतां जटापटलांत क्रम या शब्दाचा अर्थ संहिता कसा ? असें म्हणाल तर सांगतों ' पदप्रकृतिः संहिता ' या निरुक्तवचनानें संहिता ही पद आहे प्रकृति जीची (पदं प्रकृतिः यस्याः सा) अशी असते आणि ती संहिता क्रमरूपच होय. असें म्हटलें आहे. (याचें अधिक स्पष्टीकरण ऋक् प्रातिशाख्याच्या दुसऱ्या पटलांत आहे. तें असें–संहिता पदप्रकृतिः, पदान्तान्पदादिभिः संदधदेति यत्सा । कालाव्यवायेन...अशी कारिका आहे तिचा अर्थ " संहिता पदप्रकृतिः " हें अधिकारसूत्र आहे. ह्याची जरूर तेथें अनुवृत्ति येते. सूत्रार्थः– संहिता ही पदें किंवा पदपाठ जिला मूळ आधार आहे अशी असते. कारण पदें हीं सिद्ध असल्यामुळें त्यामध्यें षत्व, णत्व वगैरे वर्णविकार असत नाहींत. पदाची विकृति म्हणजे (बदललेलें रूप) असलेल्या संहितापाठांतच ते विकार दिसतात. आतां पुढच्या प्रातिशाख्य सूत्रांत संहितेचें लक्षण दिलें आहे. तें असें–

सूत्रार्थः— या सूत्रांत कालाचें व्यवधान म्हणजे अंतर न सोडतां पठन करणारा पहिल्या पदाच्या अंताला पुढील पदाच्या आद्यावयवाशीं जोडून म्हणत जातो तीच संहिता होय. ती संहिता आर्षी व क्रम अशी दोन प्रकारची आहे. मंत्रपाठ (मन्त्रद्रष्ट्या ऋषीनें प्रथम पाहिलेला) म्हणजेच आर्षीसंहिता होय. प्रातिशाख्याच्या दहाव्या पटलांत " **क्रमो द्वाभ्यां** " वगैरे कारिकांनीं सांगितलेलें विशेष प्रकारचें पठन तीच क्रमसंहिता होय. जसें पर्जन्याय प्र. म्ह. प्रगायत इति वस्तुतः अपौरुषेय वेदाचा ब्रह्मादिकांच्या मुखांतून संहितारूपानें आविर्भाव झाल्यावर अर्थद्रष्ट्या मुनींनीं नंतर वेदांचीं

खण्डें किंवा पदें पाडलीं असावीं. ह्या दृष्टीनें विचार केल्यास संहिता हीच पदांची प्रकृति म्ह. मूलावस्था दिसते. परंतु प्रातिशाख्य व शिक्षा वगैरे उच्चारणशास्त्रांत वर्णस्फोट, पदस्फोट व वाक्य वगैरे अवयवांच्या सिद्धीला आवश्यक असते म्हणून पद हीच संहितेची प्रकृति असें शास्त्रांत मानणें भाग पडतें. म्हणून शौनकानें हें प्रातिशाख्यसूत्र रचलें आहे. पाणिनीय शास्त्रांत " **परः सन्निकर्षः संहिता** " हें संहितेचें लक्षण दिलें आहे. त्याचा अभिप्राय हाच आहे. **क्रमपदः क्रमः संहिता तस्याः पदानि इति द्वे प्रकृतिपरायणे । द्वे विकृतिरूपे, विकृतिस्तु अष्टविधा भवति । तच्च । जटामालाशिखारेखाध्वजोदण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥ १ ॥ इति आसां मध्ये जटादण्डयोः प्राधान्यम् । तत्कथम् । जटानुसारिणी शिखा, दण्डानुसारिणी माला, लेखा ध्वजो रथश्च । घनस्तु उभयानुसारित्वात् अस्याः नियमवाक्यानि व्याडीकृतजटापटले उदाहरणानि च तत्र जटावाक्यम् ॥ क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् । अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥ अस्यार्थः— क्रमे यथोक्ते सति 'क्रमो द्वाभ्यां' इत्याद्युक्तप्रकारे पदजातं पदद्वयं त्रयं वा द्विवारमभ्यसेत् द्विवारं पठेत् अभ्यासप्रकारः । उत्तरमेव पूर्वं । क्रमवत् पदद्वयं गृहीत्वा पूर्वं नाम प्रथमं उत्तरपदमभ्यसेत् । ततः उत्तरपूर्वपदयोः संधानद्वारा पूर्वं अभ्यस्योत्तरपदेऽवसानम् । एवं प्रकारेणाध्ययनं जटाभिधीयते कथ्यते उदाहरणेन दृश्यते । अग्निमीळ इळेऽग्निमग्निमीळे इत्यादि ज्ञेयम् ।**

भाष्यार्थ— क्रमपद याचा अर्थ क्रम म्ह. संहिता; तिचीं पदें म्हणजे क्रमपद. तात्पर्य, क्रमपार व क्रमपद या पदांनीं सांगितलेलीं हीं दोन प्रकृतिपारायणें समजावीं. क्रमजट व क्रमदण्ड हीं दोन विकृतिपारायणें होत. विकृति आठ प्रकारची. जटा, माला, शिखा, रेखा, ध्वज, दण्ड, रथ व घन. या आठ विकृतींत शिखा, जटेला अनुसरणारी, माला,

रेखा, ध्वज व रथ ह्या दण्डानुसारी होत. या विकृतीचें नियमवाक्य व्याडी-कृतजटापटलांत उदाहरणासह आहेत. तेथें ' क्रमेयथोक्ते 'हें जटानियमवाक्य आहे त्याचा अर्थ:— ऋक्प्रतिशाख्यपटलांतील[1] ' क्रमो द्वाभ्यां ' या कारिकेनुसार दोन पदांचा किंवा तीन पदांचा क्रम म्हणावा व तींच तींच दोन किंवा तीन पद पुनः दोन वेळ म्हणावींत. द्विवार म्हणण्याचा प्रकार असा, ज्या दोन पदांचा किंवा तीन पदांचा कम म्हटला आहे त्यांतील उत्तरपद म्ह. पुढचें पद प्रथम म्हणून नंतर पहिलें म्हणावें. नंतर पुन्हां पहिलें म्हणून पुढच्या पदावर अवसान (विश्रांति) घ्यावें ह्या प्रकारांस जटा हें नांव आहे. हि हें अव्यय निश्चयार्थी जाणावें. उ. **अग्निमीळे इळेग्निमग्निमीळे । इळे पुरोहितं पुरोहितमीळ इळे पुरोहितं इ. । दण्डलक्षणम् । क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरं । अर्धर्चादेव मुक्तोक्तः क्रमदण्डोऽभिधीयते ॥ २ ॥ मालालक्षणम् ॥ ब्रूयात् क्रमविपर्यासावर्धर्चस्यादितोन्ततः । अन्तं चादि नयेदेवं क्रममालेति गीयते ॥ ४ ॥ माला मालेवपुष्पाणां पदानां ग्रथिनी हि सा । आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ॥ ४ ॥ शिखालक्षणम् ॥ पदोत्तरां जटामेव शिखामार्याः प्रचक्षते । ॥ रेखालक्षणम् ॥ क्रमात् द्वित्रिचतुःपंच पदक्रममुदाहरेत् । पृथक् पृथक् विपर्यस्य लेखामाहुः पुनः क्रमात् ॥ ५ ॥ ध्वजलक्षणम् ॥ ब्रुयादादेः क्रमं सम्यगान्तादुच्चारयेद्यदि । वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः ॥ ६ ॥ रथलक्षणम् ॥ पादशोऽर्धर्चशो वापि सहोक्त्या दण्डवद्रथः ॥ ७ ॥ घनलक्षणम् ॥ जटामुक्त्वा विपर्यस्य तत्पादानि पुनः पठेत् । अयं घन इति प्रोक्त इत्यष्टौ विकृतीः पठेत् । अन्यच्च घनलक्षणम् । अन्तात् क्रमं पठेत् पूर्वं आदिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ ८ ॥ इत्यष्टविकृतिलक्षणान्युक्तानि ।**

---

१ क्रमोद्वाभ्यामभिक्रम्य प्रत्यदायोत्तरं तयोः । उत्तरेणोपसंदध्यात् तथार्धर्चसमापयेत् । प्राति. प. १०

सूचनाः— भाष्यांतील दण्डादि आठ विकृतींचीं लक्षणें संस्कृतांत वर दिलीं आहेत. त्यांचा अर्थ व उदाहरणें येथें दिलीं नाहींत. तीं आम्हीं स्वतन्त्र दुसऱ्या भागांत मूळ संस्कृतकारिका, त्यांवरील संस्कृतविवरण व भाषांतरासह उदाहरणें दिलीं आहेत तीं पहावीं.

भाष्यः—अध्ययने १ संहितापारायणं २ पदपारायणं ३ जटापारायणं ४ क्रमदण्डपारायणं एतत्पारायणचतुष्टयमित्यर्थः ॥ ६ ॥

भाष्यार्थः— अध्ययनांत १ संहितापारायण, २ पदपारायण, ३ जटापारायण, ४ क्रमदण्डपारायण अशीं चारच पारायणें आहेत.

मूलसूत्रः— एतेषां शाखाः पञ्चविधा भवान्ति ॥ ७ ॥

भाष्यः— एतेषां वेदपारायणानां पंचशाखा भवन्ति इत्यर्थः। ताः का इत्याह। अश्वलायनी, सांख्यायनी, शाकला, बाष्कला, माण्डूकेयाश्चेति ॥ ८ ॥ भाष्यः— इात प्रसिद्ध ः।

भाष्यार्थ— वर उल्लेखिलेल्या वेदपारायणांच्या शाखा पांच आहेत. त्या कोणत्या तें सांगतों; भाष्यार्थ :— १ आश्वलायनी, २ सांख्यायनी, ३ शाकला, ४ बाष्कला, ५ मांडुकेया ह्या प्रसिद्ध पांच शाखा होत.

मूलसूत्रः— तेषामध्ययनम् ॥ ९ ॥

भाष्यः— तेषां आश्वलायनादिशाखानां समानाध्ययनं सूचयाति

मूलसूत्रम्ः— अध्यायादि चतुःषष्टिर्मंडलानि दशैव तु ॥१०॥

भाष्यः— अध्यायाश्चतुःषष्टिः 'अग्निमीळे अयं देवाय' इत्यादि चतुःषष्टिरध्याया इत्यर्थः मंडलानि दशैव तु 'अग्निमीळे कुषुंभक' इत्याद्युपाकर्मप्रसिद्धानीत्यर्थः।

भाष्यार्थः— उपर्युक्त आश्वलायनादि शाखांचें समान म्हणजे सारखें अध्ययन किती व कोणतें तें सांगतों. अध्याय ६४ (चौसष्ट, 'अग्निमीळे

अ यंदेवाय, एताया, अयं वा, प्रमन्महे, इन्द्रो मदाय, द्वे विरूपे, इदं श्रेष्ठ' इत्यादि (परिशिष्ट १ पहा.) मंडलें (१०) दहा 'अग्निमीळे, कुशुंभक' इत्यादि उपाकर्मांत प्रसिद्ध असलेलीं.

मूलसूत्रम्:— वर्गाणां परिसंख्यातं द्वे सहस्रे षळुत्तरे। सहस्रमेकं सूक्तानां निर्विंशकं विकल्पितम् ॥ १॥ दशसप्तसु पठ्यन्ते संख्यातं वै पदक्रमम् ॥ एकशतसहस्रं वा द्विपञ्चाशत्सहस्रार्धमेतानि चतुर्दश वासिष्ठानां इतरेषां पञ्चाशीतिः ।

भाष्यः— वर्गादि आऋचान्ता संख्या वालखिल्यैर्विना ज्ञेया॥ षडुत्तरसहस्रद्वयवर्गाः इत्यर्थः॥ 'सहस्रमेकं सूक्तानां निर्विंशकं विकल्पितम्' 'दशसप्तसु पठ्यन्ते' सप्तदशाधिकसहस्रसूक्तानीत्यर्थः॥ 'संख्यातं वै पदक्रमम्' "एकशतसहस्रं वा द्विपञ्चाशत्सहस्रार्धमेतानि चतुर्दशपदानि वासिष्ठांना इतरेषां पञ्चाशीतिः"। एकलक्षद्विपञ्चाशत्सहस्रपंचशतचतुर्दश १५२५१४ वासिष्ठगोत्रीयाणां 'इंद्रोतिभिः' एकसप्ततिपदात्मको वर्गो नास्ति। इतरगोत्रीयाणां पञ्चाशीत्यधिकानि पदानि इत्यर्थः॥

भाष्यार्थः-- वर्गापासून ऋचेपर्यंतची संख्या (वर्ग, सूक्त व ऋचा) वालखिल्यमन्त्र (सहाव्या अष्टकांतील चौथ्या अध्यायाच्या १४व्या वर्गापासून ३१व्या वर्गापर्यंत) सोडून आहे. असें समजावें. वर्गसंख्या २००६, सूक्तसंख्या १०१७, पदसंख्या वासिष्ठगोत्रीयांची १५२५१४. कारण त्यांना तिसऱ्या अष्टकांतील तिसऱ्या अध्यायाचा तेविसावा 'इंद्रोतिभिः' हा ७१ पदांचा वर्ग नाहीं. इतर गोत्रीयांची पदसंख्या पूर्वोक्तसंख्येपेक्षां ७१ पदांनीं अधिक म्हणजे १५२५८५ आहे.

भाष्यः— अथ वालखिल्यसहित पदसंख्या उच्यते — लक्षैकन्तु त्रिपंचाशत्–सहस्रं शतसप्तकम् । पदानि च द्विनवतिः प्रमाणं शाकलस्य च ॥१॥ एकलक्षत्रिपंचाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानि पदानीत्यर्थः १५३७९२ । पदानि वालखिल्यस्य ह्यर्कसंख्याशतानि च । अधिकानि तु सप्तैव वर्गा अष्टादश स्मृताः ॥ १ ॥ सप्ताधिकद्वादशशतपदानीत्यर्थः इत्याश्वलायनानाम् । शांखायनानां तु वालखिल्यसहितपदसंख्योच्यते । शाकल्यदृष्टे पदलक्षमेकं सार्धं तु वेदे त्रिसहस्रयुक्तम् । शतानि सप्तैव तथाधिकानि चत्वारि त्रिंशच्च पदानि चर्चां ॥१॥ शाकल्यो मांडूकगणस्थः ॥ संहितापदानि एकलक्ष त्रिपंचाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि १५३७३४ पदानीत्यर्थः ॥ पदानि वालखिल्यस्य रुद्रसंख्याशतानि च । षट्पंचाशत्वधिका वर्गाः सप्तदश स्मृताः ॥ एकादशशतषट्पंचाशदाधिकानि वालखिल्ये पदानीत्यर्थः । अष्टपंचाशत् पदात्मक ऋक्त्रयस्य 'यमृत्विजो' वर्गों नास्ति तत्तु हविष्पांतीय सूक्ते 'द्वे समीची' वर्गे त्रिऋचानंतरं 'एक एवाग्निऋक्' 'यमृत्विजोऽऋक्' खिलरूपेण पठंति । 'ज्योतिष्मन्त' ऋचाभावः । ऋक्त्रयस्य तेषामन्ते पदाभावत्वात् । अन्ते वर्गसमाप्तौ "यावन्मात्र" मृचं पठन्ति । एवं 'द्वे समीची' इति षड्ऋचो वर्गः । आश्वलायनानां चतुर्ऋचात्मको वर्गः । इत्याश्वलायनशांखायनशाखयोर्भेदो ऽध्ययने इत्यर्थः । यस्य मत्रस्य पदाभावः तस्य खैलिकत्वं सिद्धम् । तर्हि 'त्र्यंबकं यजामहे' इति मंत्रस्य पदाभावात् तस्य खैलिकत्वं सिद्धम् । न हि उमागानात् । उपलेखायां 'त्र्यंबकं' (५।४।३० प्रथमं) 'भद्रं नः' (७।७।२) 'प्रजापते' (८।७।४,) 'ऋतं च' (८।८।४०) इति पदक्रममुभयाभिगीतं अर्धर्चान्ते पदं गीतम् । तस्मात्पदकाले क्रमकाले च पठन्ति 'क्रमो द्वैपदशः' इति वचनात् अत्र द्वितीयपदं नास्ति । अर्धर्चान्ते समापनात् क्रमाभावः । तस्मात् पदकाले क्रमकाले च पठनं स एव पदक्रम इत्यर्थः ।

भाष्यार्थ:— आतां वालखिल्यसहित पदसंख्या सांगतों. शाकलाच्या संहितेंत वालखिल्यमन्त्रांच्या पदांची संख्या १२०७ व वर्गसंख्या १८ आहे. सांख्यायनशाखेच्या संहितेची वालखिल्यसाहित मन्त्रांची संख्या सांगतों. सांख्यायनशाखेच्या लोकांना मांडूकगणांतील शाकल्यऋषींनीं सांगितलेलीं वालखिल्यसहित संहितेचीं पदें १५३७३४ आहेत. केवळ वालखिल्यपदांची संख्या ११५६ व वर्ग १७ आहेत. कारण सहाव्या अष्टकाच्या चौथ्या अध्यायांतील २९ वा 'यमृत्विजो' हा ५८ पदांचा वर्ग त्यांच्या संहितेंत नाहीं; पण आठव्या अष्टकाच्या चवथ्या अध्यायांत जें 'हविष्पांत' सूक्त आहे त्यांतील 'द्वे समीची' या वर्गात तीन ऋचांनंतर 'एक एवाग्नि' 'यमृत्विजो' ह्या दोन ऋचा खिलरूपानें म्हणण्यांत येतात. 'ज्योतिष्मंत' ह्या ऋचेचा अभाव आहे म्हणजे त्यांना ती ऋचा नाहीं. मात्र 'द्वे समीची' वर्गातील तीन ऋचांना पदें नाहींत म्हणून अन्तीं म्हणजे वर्गसमाप्तीच्या वेळीं फक्त 'यावन्मात्रं' ऋचा म्हणतात. याप्रमाणें 'द्वे समीची' वर्ग सांख्ययनांना सहा ऋचांचा व आश्वलायनशाखीयांना चार ऋचांचा आहे. तात्पर्य, य प्रमाणें आश्वलायन व सांख्यायन या दोन शाखांचा अध्ययनभेद आहे. ज्या मंत्राला पदें नसतात तो मंत्र 'खिल'-संज्ञक समजावा. यामुळें अशी शंका येण्याचा संभव आहे कीं, 'त्र्यंबकं यजामहे' या मंत्रालाही पदें नाहींत म्हणून त्यास 'खिल' म्हणणें प्राप्त आहे; पण हा पूर्वपक्ष बरोबर नाहीं. कारण तें उमागान आहे. उपलेखा-ग्रंथांत 'त्र्यंबकं, भद्रं नः, प्रजापते, ऋतं च' या चार मंत्रांना उमागानामुळें अर्धर्चान्ती एकपदत्व आहे असें वर्णन आहे. शिवाय 'क्रमो द्वैपदशः' या प्रातिशाख्यवचनांत दोन पदांशिवाय क्रम संभवनीय नाहीं असें स्पष्ट म्हटलें आहे. आतां दुसरें पद नाहीं म्हणून वर सांगितलेल्या चार मंत्रांना क्रमाभाव आहे. करितां वैदिक पदपाठाचे समयीं व क्रमाध्ययनाचे वेळीं केवळ या मंत्रांचा पाठ करतात. तात्पर्य, पद व क्रम म्हणण्याचे समयीं केवळ संहितापठन हाच त्या त्या मंत्राचा पदक्रम होय.

मूलसूत्रम्:— क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत् सहस्राणि ।

भाष्य:—षत्वे णत्वे च दीर्घत्वे आकारे सानुनासिके । त्रिचतुष्पंच-क्रमे अर्धर्चान्ते च वेष्टयेत् ॥ १ ॥ क्रमेण ज्ञातव्यानि उदाहरणानि सुषुमायातं, (२।२।१) मोषुणः (१।३।१६) वाजेषु सासहिर्भव (३।२।२२) आँ उपानसः (८।५।२६) न्याविद्धयदिलीविशस्य (१।८।१) अगादारैगुकृष्णा (१।८।१) निरुस्वसारमस्कृतोषसं (८।७।१४) अग्निमीळे० ऋत्विजमित्यृत्विजं इति । चतुस्त्रिंशत्सहस्राणि ३४००० क्रमकाळे वेष्टनानीत्यर्थः ।

मूलसूत्रम्:— द्विखण्डानां सहस्राणां द्वात्रिंशत् षोडशोत्तरा ।

भाष्य:— षोडशोत्तर द्वात्रिंशत् सहस्राणि ३२०१६ द्विखण्डानी-त्यर्थः ।

मूलसूत्रम्:— चत्वारि शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि द्वात्रिंशत् चाक्षरसहस्राणि ।

भाष्य:— चतुर्लक्षद्वात्रिंशत (४३२०००) अक्षरसहस्राणीत्यर्थः । द्वात्रिंशच्चाक्षरसहस्राणि इत्यर्थसमाप्ते पुनर्वचनम् उक्तम् ॥ १ ॥

भाष्यार्थ :— क्रम म्हणण्याचे वेळीं वेष्टनें ३४००० आहेत. वेष्टन कोठें घ्यावें याविषयीं नियम असा आहे कीं, षत्व (संहिता करतेवेळीं स् चा ष् होणें) णत्व(न् चा ण् होणें) दीर्घत्व (पदाचा ऱ्हस्व स्वर दीर्घ म्हणणें) पदपाठांत 'आ' असें पद असून संहितेंत आँ असें त्यास अनुनासिकत्व येणें, त्रिक्रम, चतुष्क्रम व पंचक्रम म्हणण्याचे वेळीं व अर्धर्चेच्या शेवटचें पद म्हणून झाल्यावर पुनः त्या पदाला वेष्टन घ्यावें. वेष्टनांचीं क्रमानें पुढील उदाहरणें पहावीं.

(१) **षत्वोदाहरणम् 'सुषुमायातं'** या उदाहरणांत पदपाठांत 'सुसुम' असें आहे व संहितेंत स्‌चा ष् झाला आहे. त्यासाठीं क्रमाचे वेळीं इति लावून 'सुसुमेति सुसुम' असें वेष्टन करावें.

(२) **णत्वोदाहरणम्:-- 'मोषुणः'** या उदाहरणांत पदपाठांत 'नः' असें पद असून संहितेंत न्‌चा ण झाला आहे. त्यामुळें मध्यपदास वेष्टन घ्यावें लागतें. 'न इति नः' असें वेष्टन.

(३) **दीर्घत्वोदाहरणम्:-- 'वाजेषु सासहिर्भव'** येथें पदपाठांत 'ससहिः' असें असून संहितेंत सचा सा होऊन त्यास दीर्घत्व आलें आहे. त्यामुळें क्रम म्हणण्याचें वेळीं 'ससहिरिति ससहिः' असें वेष्टन करावें.

(४) **सानुनासिक आकारोदाहरणम्:- "आँ उपानसः"** येथें पदांत 'आ' असून संहितेंत 'आँ' असें अनुनासिक आलें आहे. म्हणून "एत्या" असें वेष्टन आहे.

(५) **त्रिक्रमोदाहरणम्:- "न्याविध्यदिलीबिशस्य"** येथें तीन पदांचा क्रम आहे. म्हणून मधलें 'अविध्यत्' असें जें पद आहे त्यास 'अविध्यादित्यविध्यत्' असें वेष्टन घ्यावें.

(६) **चतुष्क्रमोदाहरणम्:-- "अगादारैगुक्रृष्णा"** येथें चार पदांचा क्रम आहे. म्हणून मधल्या दोन पदांना 'अरैगित्यरैक्, 'ऊमित्यूँ' अशीं वेष्टनें क्रमांत येतात.

(७) **पंचक्रमोदाहरणम् :— "निरुस्वसारमस्कृतोषसम्"** येथें पांच पदांचा क्रम आहे. म्हणून मधली 'ऊं इति' 'स्वसारम्' 'अकृत' अशीं जीं तीन पदं त्यांना । ऊमित्यूँ । स्वसारमितिस्वसारम् । अकृतेत्यकृत । अशीं वेष्टनें क्रम म्हणतांना घ्यावीं.

(८) **अग्निमीळे० ऋत्विजमित्यृत्विजम् इति स्पष्टम्।** संहितेंत दुखण्डांची संख्या ३२०१६ आहे. अक्षरांची संख्या ४३२००० आहे. 'द्वात्रिंशच्चाक्षरसहस्राणि' ही द्विरुक्ति खण्डसमाप्ति झाली हें सुचविण्यासाठीं आहे.

भाष्यः—अथ पारायणे ऋक्परिमाणमुच्यते ॥ ऋचां दशसहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिः पादश्चैतत्पारायणमुच्यते ॥१॥ एतत् पारायणं वालखिल्यैर्विना संख्यातम्॥ वालखिल्यानि पारायणे न सन्ति । तदुच्यते— ऋग्वेदान्तर्गतवालखिल्यमेकादशसूक्तं सूक्तसहस्रं सप्तदशाधिकम्, इत्यत्र ऋचां दशसहस्राणि इत्येतत्संख्याव्यतिरिक्तानि वालखिल्यानीति प्रसिद्धिः । तत्र यज्ञानुष्ठाने ब्राह्मणे सूत्रे च श्रूयते । 'वालखिल्याः शंसंति प्राणा वै वालखिल्याः' (ऐ. ब्रा.६ पं. १८ खण्ड) इति। "अभिप्रवःसुराधसम् " इति। षट् वालखिल्यानां सूक्तानि (ऐ. आ. ५ खं. १०) इति ब्राह्मणे आरण्यके च । 'अथ वालखिल्या विरहेत् ' तदुक्तं षोडशिना इति सूत्रकारः ॥ श्रौतस्मार्तसर्वकर्मानुष्ठाने वालखिल्यप्रसिद्धिः । वेदपारायणे वर्ज्यमित्यर्थः शौनकाचार्यवचनात् ।

भाष्यार्थः—आतां पारायणांतील ऋक्संख्येचें परिमाण सांगतो. पारायणासाठीं १०५८० ऋचा व एक पाद (भद्रं नो अपिवातयमनः) अशी सख्या आहे. ही संख्या वालखिल्यसोडून आहे. पारायणांत वालखिल्यें नाहींत, म्हणजे वर्ज्य करावींत. ऋग्वेदामध्यें वालखिल्य ११ सूक्तें आहेत. १०१७ सूक्तसंख्या जेथें निर्दिष्ट आहे, तेथें ती संख्या वालखिल्यसूक्तरहित समजावी. कारण ' ऋचां दशसहस्राणि ' या कारिकेंत सांगितलेल्या संख्येवेगळीं वालखिल्यसूक्तें आहेत अशी प्रसिद्धि आहे. यज्ञानुष्ठानविषयक ब्राह्मण व श्रौतसूत्र यांत पुढील श्रुति आहेत. "वालखिल्याः शंसन्ति प्राणा वै वालखिल्याः " "अभिप्रवः सुराधसम्" षड् वालखिल्यानां सूक्तानि " वालखिल्या विहरेत् तदुक्तं षोडशिना" इति सूत्रकारः या श्रुतीवरून व शौनकाचार्यवचनावरून श्रौतस्मार्तयज्ञानुष्ठानकर्मांत वालखिल्यें घ्यावींत, वेदपारायणांत वर्ज्य समजावीं.

भाष्यः— यथा प्रैषाध्यायः कुन्तपाध्यायो निविदाध्यायः सुपर्णाध्यायश्चेति। तद्वद् वालखिल्याध्याय इत्यर्थः। वालखिल्यसहिता सर्वानुक्रमणीयमन्त्ररूपी ऋक्संख्योच्यते। द्विपंचाशदाधिकपञ्चशतदशसहस्राणीति १०५५२। वालखिल्यव्यतिरिक्तसंख्या तु द्विसप्तत्याधिकचतुःशतदशसहस्रऋक् १०४७२। एतत्संख्या नित्यद्विपदा नैमित्तिकद्विपदासहिता उक्ता॥ हवनाध्ययनाभ्यां समाना सा नित्यद्विपदा। आसां संख्या उपलेखायाम्। 'तच्च' साधुरसिक्न्यां, सिषक्तुन, उरौ देवा, उरौ देवा, विद्वेषांस्ययावाजं, महिराध, आवां सुम्ने, ते ते देवाय, रायस्कामः, प्रतिनः स्तोमं, स्वायुधासः, पितुर्न पुत्रः, सनोवाजेषु, गावो न यूथं, पवस्वसोममन्दयन्निति तिस्रः, परिसुवानो, नृभिर्येमानः, प्रत्यंचमर्कमनयन् शचीभिरिति द्विपदैकपदा द्वाविंशतिस्तासां सप्तदश (१७) द्विपदा, एकपदा पञ्च इति।

भाष्यार्थः— ज्याप्रमाणें प्रैषाध्याय, कुन्तप, निविद व सुपर्ण हे अध्याय त्याचप्रमाणें वालखिल्याध्याय आहे. वालखिल्यमंत्रधरून सर्वानुक्रमणीय मन्त्ररूपी ऋक्संख्या १०५५२ आहे व वालखिल्यमंत्ररहित ऋक्संख्या १०४७२ आहे.(वालखिल्य १८ वर्ग, ११ सूक्त, ऋचा ८०) ही संख्या नित्य व नैमित्तिक द्विपदागणनेंत धरून सांगितलेली आहे. हवन व अध्ययन या दोन क्रियांत समान म्हणजे एकसारखी म्हणण्यांत येणारी ती नित्यद्विपदा होय. त्या नित्यद्विपदेचीं प्रतीकें व संख्या उपलेखाग्रंथांत दिलीं आहेत. तीं येणेंप्रमाणें: —१ साधुर्नगृध्नु (अष्टक १।५।१४), २ असिक्न्यां (३।५।२३), ३ सिषक्तुन (४।२।१६), ४ उरौ देवा (४।२।१९), ५ उरौ देवा (४।२।२२), ६ विद्वेषांसि (४।५।१२), ७ अयावाजं (४।६।३), ८ महिराधः (४।७।३४), ९ आवां सुम्ने (५।१।१४), १० ते ते देवाय (५।२।२३), ११ रायस्कामः (५।३।१७), १२ प्रतिनः स्तोमं (५।३।२७), १३ स्वायुधासः

(५।४।२४), १४ पितुर्न पुत्रः (६।१।३४), १५ सनो वाजेषु (६।४।३), १६ गावो न यूथं (६।४।६), १७ पवस्वसोममंदयन् (७।२।१६) ह्यांतील ऋचा, २० परिसुवानः चक्षसे (७।५।१२), २१ नृभिर्ये मा नः (७।५।१५), २२ प्रत्यंचमर्कमनयन् (८।८।१५) (प्रतीकांच्या समोर दिलेले अंक क्रमानें अष्टक, अध्याय व वर्गसूचक समजावेत.) याप्रमाणें द्विपदा व एकपदा मिळून बावीस. त्यांपैकीं द्विपदा १७ व एकपदा ५ आहेत.

भाष्यः—हवनाध्ययने विपरीता सा नैमित्तिक द्विपदा। ता आह वर्गरूपेण। पश्वानतायुं दश, रयिर्नदश, वनेषु दश, श्रीणन् दश, शुक्रः शुशुक्काँ दश, वनेमपूर्वी दश, अग्नेत्वन्नश्चत्वारि, अग्ने भव षट्, प्रशुकैतु दश, राजा राष्ट्राणां दश, कई व्यक्ता दश, बभ्रुरेको दश, परिप्रधन्वे दश, तं ते सोतारो द्वादश, इमानुकम् चत्वारि, आयाहि वनसा चत्वारि इति नैमित्तिकद्विपदा चत्वारिंशोत्तरशतामिति। हवने एकैका अध्ययने द्वे द्वे। आसामन्त्या एका उर्वरिता सा नित्यद्विपदा। उक्तं च परिभाषायां "विंशिका द्विपदा विराजस्तद्धमेकपदा। द्विर्द्विपदास्त्वृचः समामनन्ति। अयुक्ष्वंत्या द्विपदेव (परिभाषाखण्ड १२) इति। यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति तास्त्वृचः अध्ययने चतुष्पदा कृत्वेत्यर्थः। 'अयुक्ष्वन्त्या द्विपदैव' सूक्तस्य ऋचो युजो या न भवन्ति तास्वन्त्या नित्य द्विपदैव। एवं अध्ययने द्वावर्धर्चैऋगेव प्राधान्यम्॥

भाष्यार्थः—हवन व अध्ययन या दोन क्रियांत विपरीत म्हणजे वेगवेगळ्या रीतींनें म्हणण्यांत येते ती नैमित्तिकद्विपदा होय. त्या वर्गरूपानें सांगतों. पश्वानतायुं १० (१।५।९), रयिर्न, १० (१।५।१०), वनेषु १० (१।५।११), श्रीणन् १० (१।५।१२), शुक्रःशुशुक्कां १० (१।५।१३), वनेमपूर्वी १० (१।५।१४), अग्ने त्वन्न ४ (४।१।१६), अग्नेभव ६ (५।२।२३),

प्रशुक्रैतु १० (५।३।२५), राजा राष्ट्राणां १० (५।३।२६), कई व्यक्ता १० (५।४।२३), बभ्हरेको १० (६।२।३६), परि प्रधन्वे १० (७।५।२०), तं तेसोतारो १२, (७।५।२१), इमानुकं४ (८।८।१५), आयाहि वनसा ४ (८।८।३०), याप्रमाणें नैमित्तिक द्विपदा १४० आहेत. या नैमित्तिक द्विपदांची व्यवस्था अशी आहेः हवनक्रियेंत एक द्विपदा म्हणावयाची व अध्ययनांत (चर्चेंत) दोन म्हणावयाच्या. शेवटीं वर्गांत एकच शिल्लक राहिल्यास ती नित्याद्विपदा समजावी. उदाहरण (प्रथमाष्टकांतील 'प्रमन्महे' या पांचव्या अध्यायांत ९ व्या वर्गापासून १४ व्या वर्गाच्या शेवटापर्यंत ज्या नैमित्तिक द्विपदा आहेत त्यांची प्रारंभासून दोन दोन याप्रमाणें गणना करतां करतां शेवटीं "साधुर्नगृध्नु" ही एकच अर्धर्चा शिल्लक उरते, ती नित्याद्विपदाच होय. तिचा नामनिर्देश नित्यद्विपदेंत केला आहे. (पृ. २३ पहा) कारण परिभाषाखण्ड १२ यांत २० अक्षरांची द्विपदा. त्याच्या अर्धी म्हणजे १० अक्षरांचा एकपदा. अध्ययनांत दोन द्विपदांची ऋचा मानतात. त्या ऋचा अध्ययनांत दोन द्विपदेचे चार चरण करून घोकणें हा तात्पर्यार्थ. आतां ज्या सूक्ताच्या ऋचा समसंख्याक नसतात त्यांत शेवटीं जी उर्वारेत राहील ती नित्याद्विपदा होय. अशा रीतीनें अध्ययनांत दोन अर्धर्चांची एक ऋचा करून म्हणणेंच योग्य आहे.

भाष्यः— त्रीण्यर्धर्चायाः कथम्? तत्रापि द्वावर्धर्चावेका ऋचा। अर्धर्चा एका कर्तव्या। अध्ययनसंप्रदायबलात्। 'अनादेशेऽष्टाक्षरा पादाश्चतुष्पदाश्चर्चः' (परिभाषा खण्ड ३) इति परिभाषायाम्। अध्ययने त्रीण्यर्धर्चं ऋक् एवं संप्रदायो नास्ति। आसां परिमाणमाह। अग्निं होतारं पञ्च,सहि शर्धो न षट्,अयंजायत पञ्च,विश्वोविहायास्तिस्रः यंत्वं रथं पञ्च, प्रतद्वोचेयं षट्, पन्द्रयाह्युपनः पञ्च-इमान्तेवाचं चत्वारि, सनोनव्येभिर्वज्र्यम्। इंद्राय हि द्यौः सत, त्वया-

वयं षट्, अवर्मह एका, वनोति हि एका, आत्वाजुवो षट्, स्तीर्णं पञ्च, इमे वां सोमा एका, इमे ये ते सुवायो वा एका, प्रसुज्येष्ठं षट्, ऊतीदेवानां वर्ज्यम् । सुषुमायातं त्रीणि, प्रप्रपूषणश्चतुष्कं, अस्तु श्रौषट् चत्वारि, शचीभिर्नः वर्ज्यम् । वृषन्निद्र पञ्च, ये देवासो वर्ज्यम् । तत्रत्यऋर्यमेका, सखेसखायमेका, अयारुचा त्रीणि, एतास्त्रीणित्रीण्यर्धर्चा ऋचा, हवनीयाश्चतुर्नवतिसंख्या इति । त्रीण्यर्धर्चं ऋक्हवने । अध्ययने अर्धर्चद्वयेन ऋक् एका । अर्धर्चेनैकेवं ऋक्द्वये कर्तव्य इत्यर्थः ।

भाष्यः— पराशर उवाच— एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः । अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥ १८ ॥ यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम । वाजिनस्ते समाख्याताः सूर्योऽश्वः सोऽभवद्यतः ॥ १९ ॥ शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् । कण्वाद्यास्तु महाभागा याज्ञवल्क्यप्रवर्तिताः ॥ २० ॥ तद्गुरुर्वैशम्पायनो यानि न वेत्ति तेषां व्यासेनानुपदिष्टत्वादिति भावः । वाजिनः समाख्याता वाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वात् । इति वाजसनीयवेदोत्पत्तिः ।

भाष्यार्थः—तेव्हां सूर्यानें व्यासानें वैशंपायनऋषीला न सांगितलेले म्हणून त्यांना ठाऊक नसलेले असे यजुर्मंत्र दिले. त्या मंत्रांचें अध्ययन करणारे 'वाजी' झाले. कारण ते मंत्र सांगतांना सूर्य घोडा झाला होता. त्या वाजींचे काण्वादि १५ भेद याज्ञवल्क्यानें प्रसिद्ध केले. याप्रमाणें शुक्लयजुर्वेदाची उत्पत्ति झाली.

भाष्यः— ‘काण्वाः माध्यंदिनाः शाकेयाः स्थापायनीयाः कापालाः पौंडरवत्सा आवटिकाः परमावटिकाः पाराशर्या वैधेया वैणेया औधेया गालवा बैजवाः कात्यायनीयाश्चेति’ (पञ्चदश शाखा इत्यर्थः।)

‘प्रतिपदमनुपदं, प्रतिपदे अनुपदं अल्पपदं कर्तव्यमित्यर्थः। छंदः, छंदोरत्नाकरादि। भाषा शब्दपरिभाषा। धर्मः धर्मशास्त्रं मिताक्षरादि। मीमांसा प्रसिद्धा। न्यायस्तर्कः न्यायशब्देन काणादसूत्रम्। तर्कशब्देन गौतमसूत्रम् इति षडुपांगानि। उपज्योतिषं ज्योतिःशास्त्रम्। सांगलक्षणं सामुद्रिकादि। (यूपलक्षणं छागलक्षणं च यज्ञे प्रसिद्धम्)। प्रतिज्ञासूत्रम् खण्डत्रयात्मकम्। अनुवाकाध्यायः। वेदशाखापरिज्ञानार्थं चरणव्यूहसूत्रम्। श्राद्धसूत्रम् नवखण्डात्मकम्। श्रौतयज्ञार्थं मंडपरचनात्मकं शुल्बसूत्रम्। पार्षदपरिशिष्टसूत्रम्। ऋग्यजुर्निर्णयात्मकं ऋग्यजुःपरिशिष्टसूत्रम्। इष्टकापूरणपरिशिष्टसूत्रम्। गोत्रप्रवरनिर्णयार्थः प्रवराध्यायः। उक्थशास्त्रपरिशिष्टम्। क्रतुसंख्या। निगम यज्ञपार्श्व हौत्रक प्रसवोत्थान कूर्मलक्षणपरिशिष्टपञ्चकं। यज्ञेषु प्रसिद्धम्। एतानि परिशिष्टानि अष्टादशसंख्याकानि कात्यायनमहर्षिप्रणीतानि।

भाष्यार्थः—काण्व, माध्यंदिन इत्यादि या पंधरा शाखांचीं नांवें आहेत. प्रत्येक उपांगसंज्ञक पदाच्या मागें ‘अनु’ म्हणजे अल्प पद ठेवावें. उदाहरण, अनुच्छद, अनुभाषा इत्यादि. छंद म्हणजे छंदोरत्नाकर वगैरे. भाषा म्हणजे शब्दपरिभाषा. धर्म म्हणजे मिताक्षरादिधर्मशास्त्र. मीमांसा. पूर्वमीमांसा (जैमिनीकृत १२ अध्याय). न्याय म्हणजे काणादसूत्र. तर्क म्हणजे गौतमसूत्र. अशीं सहा उपांगें आहेत. १. उपज्योतिष म्हणजे ज्योतिःशास्त्र, २. सांगलक्षण म्हणजे सामुद्रिक इत्यादि. (यूपलक्षण व छागलक्षण यज्ञांत प्रसिद्ध आहेत.) ३. प्रतिज्ञासूत्र खंड तीन. ४. अनुवाकाध्याय ५. चरणव्यूह (वेदांच्या शाखांचें ज्ञान होण्यासाठीं) ६. श्राद्धसूत्र नवखंड.

७. श्रौतयज्ञमंडपरचनाकरण्यासाठीं शुल्बसूत्र. ८. पार्श्वदपरिशिष्टसूत्र. ९. ऋग्वेद व यजुर्वेदनिर्णयाकरितां ऋग्यजुः परिशिष्टसूत्र. १०. इष्टकापूरणपरिशिष्टसूत्र. ११. गोत्रप्रवरनिर्णयार्थ प्रवराध्याय. १२. उक्थशास्त्रपरिशिष्ट. १३. क्रतुसंख्या. १४. निगम, १५. यज्ञपार्श्व, १६. हौत्रक. १७. प्रसवोत्थान व १८. कूर्मलक्षण अशीं अठरा परिशिष्टें कात्यायनमहर्षींनी लिहिलीं आहेत. (हें भाषांतर चौखम्बामुद्रित असलेल्या पाठाप्रमाणें आहे.)

भाष्यः— द्वे सहस्रे शते न्यूने मंत्रे वाजसनेयके । इत्युक्तमेतत्सकलं सशुक्रियम् । ग्रंथाश्च परिसंख्यातं ब्राह्मणं च चतुर्गुणम् ॥ वाजसनेयके वेदे नवशताधिकसहस्रमंत्राः इत्यर्थः । सकलं एतत् सशुक्रियं (' ऋचं वाचं ' इति षट्त्रिंशदध्यायोक्तचतुर्विंशदृचात्मकसहितम् । मध्याह्ने शुक्लवर्णेन सूर्येण दत्तः स शुक्लयजुः परिसंख्यात इत्यर्थः । वेदोपक्रमणे चतुर्दशीयुक्तपौर्णिमाग्रहणात् शुक्लयजुः । प्रतिपदायुक्तपौर्णिमाग्रहणात् कृष्णयजुः इति वा (ऋक्संख्या पञ्चविंशत्युत्तरैकोनविंशतिः १९२५ खिलमंत्राः ' अग्निश्च ' इति षड्विंशत्यध्यायोक्ताः । यजुःसंख्या अष्टाविंशत्युत्तराष्टशतान्यष्टौ सहस्राणि)' ब्राह्मणं च चतुर्गुणं ' वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः । यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम् । तत्रापि च शिवाः शाखा दशपञ्च च वाजिनाम् ॥ तत्रापि मुख्या विज्ञेया शाखा या कण्वसंज्ञिका । इति ग्रथान्तरे ।

भाष्यार्थ--वाजसनेयी वेदांत १९०० (२०००-१००) मंत्र आहेत. ते सर्व सशुक्रिय आहेत. सशुक्रिय म्हणजे शुक्लयजुर्वेदाच्या ३६ व्या अध्यायांत ' ऋचंवाचं ' इत्यादि चोवीस ऋचांसहित म्हणजे १९२४ आहेत. त्या वेदास शुक्लयजु म्हणण्याचीं कारणें दोन. माध्यान्हकालीं सूर्यानें दिला हें एक व दुसरें त्यांना उपकर्मासाठीं चतुर्दशीयुक्त पौर्णिमा सांगि-

तली आहे हें होय. ज्या शाखीयांना उपाकर्मासाठीं प्रतिपदायुक्त पौर्णिमा घ्यावी असा आदेश आहे ते ' कृष्णयजु ' होत. ग्रंथान्तरीं यजुर्वेदरूप वृक्षाच्या शाखा १०१ आहेत. त्यांपैकीं वाजीच्या १५ शाखा कल्याण-कारक असून त्या शाखेंत 'कण्वशाखा' प्रथम म्हणजे मुख्य सांगितली आहे.

भाष्यः— तत्र तैत्तिरीयकाणां द्विभेदा भवन्ति । औख्या खांडिकेयाश्चेति । खांडिकेयानां पञ्चभेदा भवन्ति । आपस्तंबी बौधायनी सत्याषाढी हिरण्यकेशी औधेयीचेति । तेषामध्ययन-परिमाणम् । कांडास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिक्यकाश्चतुः ॥ चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् ॥ १ ॥ एकपञ्चाशद-धिकाः संख्या पञ्चाशदुच्यते । द्विसहस्रं चैकशतमष्टानवति चाधिका ॥ २ ॥ लक्षैकन्तु द्विनवतिसहस्राणि प्रकीर्तितम् । पदानि नवतिश्चैव तथैवाक्षर मुच्यते ॥ ३ ॥ लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम् । अष्टषष्ट्याधिकं चैव यजुर्वेदप्रमाणकम् ॥ ४ ॥ काण्डाः ७, प्रश्नाः ४४, अनुवाकाः ६५१, पन्नाशी २१९८, पदानि १९२०९०, अक्षराणि २५३८६८। शाखावाक्यान्ययुतानि सहस्राणि नवानि च । चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते ॥ १ ॥ इति ब्राह्मणे अष्टौ वाक्यसंख्या १९४८० । इति तैत्तिरीयानिगदवेदाख्यसंख्योक्ता इत्यर्थः ।

भाष्यार्थः—तैत्तिरीय शाखेचे भेद दोन. १. औख्य, २. खांडि-केय. खांडिकेयाचे भेद पांच. १. आपस्तंबी, २. बौधायनी, ३. सत्या-षाढी, ४. हिरण्यकेशी व ५. औधेयी असे आहेत. त्यांचें अध्ययनाचें परिमाण पुढें दिल्याप्रमाणें आहे. कांड ७, प्रश्न ४४, अनुवाक ६५१, पन्नासा २१९८, पदें १९२०९०, अक्षरें २५३८६८. ब्राह्मणग्रंथांतील आठ आठ वाक्यांची संख्या १९४८०. याप्रमाणें तैत्तिरीय शाखेच्या ' निगद ' वेदाची संख्या सांगितली.

भाष्यः—मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते। यजुर्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः॥ मंत्रश्च ब्राह्मणं च मंत्रब्राह्मणे तयोर्मन्त्रब्राह्मणयोः वेद इति संज्ञा। तदुक्तं 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यृक्शाखीयप्रातिशाख्य भाष्यकारेणोव्वटेन आपस्तंबीय सामान्यसूत्रभाष्यकारेण कपर्दिना धूर्तस्वामिना च। तथा च सति मंत्रो नाम संहितामंत्रः। तादृङ्मंत्ररूपसंहितायाः मध्ये एव तदग्रे, ब्राह्मणत्वेन पठनमित्युभयथाऽपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणपठनमिति स मंत्रब्राह्मणयोर्वेदस्त्रिगुणं पठ्यते इत्यर्थः। एतादृशपठनं शाखायाः अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति। तथाहि संपश्यामि "प्रजाऽअहमिहप्रजासोमानवीः" इति संहितामंत्रः॥ एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव संपश्यामि—"प्रजाअहमित्याह यावन्त एवेति" ब्राह्मणमित्युभयोरपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणितं पठनं भवति। एतादृशमुदाहरणान्तरमाह—"इमामगृभ्णन्रशनामृतस्यपूर्व आयुषिविदथेषु" इति संहितामंत्रः। एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव संहितारूपेण वर्तते तत्कथम्? इत्यपेक्षायामाह "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति ब्राह्मणम्। अनेयोरपि त्रिगुणत्वेन पठनं "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" इति त्रिगुणत्वेन पठनं भवति। एते त्रिगुणाः कस्यामपि शाखायां न भवन्ति किन्तु गाथासंग्रथत्वात्। एवमन्यानि बह्वानि वाक्यानि सन्ति। अतः कारणात् अन्यानि शाखान्तराणि स्मृतानि। तेषामध्ययनं प्रवचनीयाश्चेति। एतेषां शुक्लकृष्णयजुषां पठनं प्रवचनीयाः प्रतिवचनत्वेन च समाप्तमित्यर्थः॥ २॥

भाष्यार्थः— यजुर्वेदाचें लक्षण संहितामंत्र व ब्राह्मणमिश्रित जो वेद तोच कृष्णयजुर्वेद मुख्य होय. इतर शुक्लयजुर्वेदादि शाखा होत. 'मंत्रब्राह्मणयोर्वेदनामधेयम्' असें ऋक्शाखीय प्रातिशाख्यभाष्यकार उवटा-

चार्य व आपस्तंबसूत्रभाष्यकार कपर्दी व धूर्तस्वामी यांनीं वेदांचे वर जें लक्षण सांगितलें आहे त्याचें विवरण पुढीलप्रमाणें केलें आहे. मंत्र म्हणजे संहितामंत्र आणि तशा मंत्ररूपसंहितेमध्येंच त्याच्याच पुढें त्याचा ब्राह्मण म्हणजे त्या मंत्राचा कर्मामध्यें विनियोग सांगणारें वचन या दोहोंचें संहिता, पद व क्रमरूपानें त्रिगुणपठन म्हणजे अध्ययन ज्या शाखेंत आहे तिला मुख्य यजुर्वेद असें नांव आहे. अशा प्रकारचें अध्ययन फक्त तैत्तिरीय शाखेंतच आहे. त्याचें उदाहरण 'प्रजाअहमिहप्रजासो मानवीः' हा संहितामंत्र. त्यापुढेंच त्या मंत्राचा विनियोग सांगणारा ब्राह्मण 'प्रजा-अहमित्याह' हा आहे. या उभयांचें संहिता, पद, क्रम या रीतीनें जें पठन तें त्रिगुणपठन होतें. अशाच रीतींचें दुसरें उदाहरण सांगतों— "इमामगृभ्णन्रशनामृतस्यपूर्व आयुषि विदथेषु" हा संहितामंत्र व त्यापुढें संहितेतच संहितारूपानें ब्राह्मण सांगितला आहे. तो कसा अशी आकांक्षा उत्पन्न होईल म्हणून सांगतों. "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानी-मादत्ते" हा ब्राह्मण दिला आहे. तात्पर्य, संहिता व ब्राह्मण या उभतांचेंही त्रिगुणत्वानें म्हणजे उदात्त, अनुदात्त, स्वरित या स्वरांत पठन हे त्रिगुण कोणत्याही शाखेंत नाहींत; कारण इतर शाखांचे ब्राह्मणादि ग्रंथ गाथारूप आहेत म्हणून त्या शाखा होत. या शुक्ल व कृष्ण यजुर्मंत्रांचें अध्ययन प्रतिवचनीयत्वानें आर्षीपाठानेंच समाप्त होतें हा इत्यर्थ होय. उदाहणार्थ अग्नये नु ब्रह्मन्नपः प्रणेष्याभि ब्रूउहि हा प्रैष व अग्निर्वृत्राणिजंघनत् ॐ प्रणय हें प्रातिवचन हे दोन्हीं आर्षीपाठ होत.

भाष्यः—अन्यान्यपि पुराणवाक्यानि संगृहीतानि—अग्नि-मींडे नमस्तुभ्यं इषेत्वोर्जे त्वसत्तनुः। अग्न आयाहि वीतये शंनो देवीस्वरूपवान् ॥ १ ॥ इषेत्वोर्जे यजुर्वेदशब्दः पुरुष एव च। नभश्च पूर्णिमा सूर्य-उदयव्यापिनी तथा ॥ २ ॥ संगृह्यमाणश्च यो वेदं प्रतिवर्षे व्रतं चरेत्। यातयामनिवृत्त्यर्थं छंदस्य च विशेषतः ॥ ३ ॥

तस्योष्णिक् छंदलोमेषु गायत्री च त्वचा स्मृता। मांसेषु त्रिष्टुभं विद्यात् अनुष्टुब् रुधिरः स्मृतः ॥ ४ ॥ अस्थिषु जगती चैव मज्जासु पंक्तिरेव च। प्राणेषु बृहती छंदो यजुर्वेदस्य लक्षणम् ॥५ ॥ एतदर्थे ऐतरेयश्रुतिः "शुक्लकृष्णकनीनिकेति" स यदि ह वाऽपि मृषा वदति य एवमेतं छंदसां छंदस्त्वं वेद" इत्यन्तम्।

भाष्यार्थः—दुसरीं संग्रहित केलेलीं पुराणवचनें अशीं आहेत. 'अग्निमीडे', 'इषेत्वोर्जे', 'अग्न आयाहि', 'शंनोदेवी' अशीं चार वेदांचीं प्रतीकें देऊन तो वेद स्वरूपवान् आहे, इतकेंच नव्हे तर तो 'लसत्तनुः' शोभिवंत शरीर धारण करणारा आहे. 'इषेत्वोर्जे' हा यजुर्वेदशब्द पुरुषवाचकच होय. यजुर्वेदाच्या 'यातयाम' निवृत्तिसाठीं या वेदाचा संग्रह करणाऱ्यानें प्रतिवर्षी श्रावणमास उदयव्यापिपूर्णिमा या दिवशीं व्रत (उपाकर्म) करावें. या वेदपुरुषाचें लक्षण पुढीलप्रमाणें आहे. त्याचे लोम (सर्व शरीरावर असणारी लव) उष्णिक् छंद, त्वचा गायत्रीछंद, मांस त्रिष्टुभ्, अनुष्टुप् रक्त, अस्थि जगती, मज्जा पंक्तिछंद, प्राणाचे ठिकाणीं बृहतीछंद आहे. याविषयीं ऐतरेय श्रुति आहे. 'शुक्लकृष्णकनीनिकेति'।

भाष्यः—पुण्याहवाचने मंत्रान् प्रोक्षणे कंकणस्य च। सभायां ब्रह्मयज्ञे च इषेत्वोर्जे यजुः पठेत् ॥ १ ॥ शांखायनो ब्रह्मयज्ञे इषेत्वोर्जे यजुः स्मरेत्। श्रौते स्मार्ते च पूर्ते च सर्वकर्मसु योजितः ॥ २ ॥ ऋग्यजुःसामाथर्वांश्च सभायां कुण्डमण्डपे। ब्रह्मयज्ञे प्रतिसरे पठेद्वै स्वस्तिवाचने ॥ ३ ॥ अन्यत्र समुदायश्च प्रायश्चित्तसभासु ते। यजुर्वेदोपनिषदि मंत्राः शाकलकाः स्मृताः ॥ ४ ॥ उपदिष्टाः शौनकेन आत्मशिष्याय शाकले। तेषां शाकलमंत्राणां यजुःसंज्ञा समीरिता ॥ ५ ॥ यस्य वेदे शाकलमंत्राः तेषां यजुःसंज्ञा इत्यर्थः ॥ व्याख्या चरणव्यूहस्य यजुःखण्डस्य वै मया। विस्ता

रिता यथाबुद्धि महादेवप्रसादतः ॥ १ ॥ इति चरणव्यूहे द्वितीयखण्डव्याख्या समाप्ता । इति द्वितीयः यजुर्वेदखण्डः समाप्तः ॥

भाष्यार्थः—पुण्याहवाचन, कंकणप्रोक्षण, सभा व ब्रह्मयज्ञ यांमध्यें "इषेत्वोर्जे" यजु म्हणावा. शांखायनानें ब्रह्मयज्ञांत 'इषेत्वोर्जे' या यजूचें स्मरण करावें. याला श्रौत, स्मार्त, पूर्त इत्यादि कर्मांत त्याचाच विनियोग सांगितला आहे. ऋक्, यजु, साम व अथर्ववेदाचे सभा, कुण्डमंडप, ब्रह्मयज्ञ, प्रतिसरबन्ध, पुण्याहवाचन व इतरत्न प्रायश्चित्त वगैरे कर्मांत म्हणावयाचे मंत्र यजुर्वेदाच्या उपनिषदांत सांगितलेले आहेत. म्हणून त्या शाकलमंत्रांना "यजु" असें नांव दिलें आहे. तात्पर्य, ज्या ज्या वेदांत शाकलमंत्र असतील ते 'यजुःसंज्ञक' होत. याप्रमाणें चरणव्यूहाच्या दुसऱ्या खण्डाचें महीदासानें यथाबुद्धि विश्वेश्वरकृपेनें विवरण केलें आहे.

याप्रमाणें चरणव्यूहग्रंथांतील दुसऱ्या खंडाचें महीदासाच्या भाष्यासह भाषांतर समाप्त झालें.

चरणव्यूहप्रथमभागस्तृतीयखण्डः

सामवेदवर्णनम्

भाष्यः—अथ तृतीयखण्डो व्याख्यायते ॥

मूलसूत्रः—सामवेदस्य किल सहस्रभेदा आसन्ननध्यायेष्वधीयानास्ते शक्रेण वज्रेणाभिहताः प्रनष्टाः शेषान् प्रवक्ष्यामि ।

भाष्यः--सामवेदस्येति किलेति।प्रसिद्धौ सहस्रभेदा आसन्। सहस्रभेदमध्ये शक्रेण वज्रेणाभिहताः प्रनष्टाः "अनध्यायेष्वधीयाना म्रियन्ते विद्युता खलु" इति। शेषान् शाखापाठकान् वक्ष्यामः॥

भाष्यार्थः--आतां चरणव्यूहाच्या तिसऱ्या खंडाचें व्याख्यान करतों. सामवेदाचे १००० भेद होते. त्यांपैकीं अनध्यायदिवशीं जे अध्ययन करणारे होते त्यांना इन्द्रानें आपल्या वज्रानें नष्ट केलें. 'अनध्यायदिवशीं जे अध्ययन करणारे असतात ते विजेनें नाश पावतात असें पुराणवचन आहे. आतां उर्वरित शाखापाठक कोणते ते सांगतों.

मूलसूत्रः—आसुरायणीया, वासुरायणीया, वार्तान्तिरेयाः, प्राञ्जलऋग्वैनविधाः, प्राचीनयोग्याः राणायनीयाश्चेति । राणायनीयानाम् नवभेदा भवन्ति । राणायनीयाः, शाठ्यायनीयाः, सात्यमुद्गलाः, खल्वलाः, महाखल्वलाः, लांगलाः, कौथुमाः, गौतमाः, जैमिनीयाश्चेति । तेषामध्ययनम् ।

भाष्यार्थः—१. आसुरायणीय, २. वासुरायणीय, ३. वार्तान्तरेय, ४. प्रांजल ऋग्वैनविध, ५. प्राचीनयोग्य, ६. राणायनीय. त्यांत राणायनीय शाखेचे नऊ भेद आहेत. त्यांचीं नांवें १. राणायनीय, २. शाठ्यायनीय, ३. सात्यमुद्गल, ४. खल्वल, ५. महाखल्वल, ६. लांगल, ७. कौथुम, ८. गौतम व ९. जैमिनीय. त्यांचें अध्ययन.

मूलसूत्र—अष्टौ सामसहस्राणि सामानि च चतुर्दश। अष्टौ शतानि दशभिर्दशसप्तसु वालखिल्यकम् ॥ १ ॥ ससुपर्ण प्रेक्ष्य मेतत्सामगणं स्मृतम् ॥ प्रकारान्तरेण आह तत्र राणायनीयानां सप्तभेदा भवन्ति। १. राणायनीयाः, २. सात्यमुग्राः, ३. कालेयाः ४. महाकालेयाः, ५. लांगलायनाः, ६. शार्दूलाः, ७. कौथुमाश्चेति। तत्र कौथुमानां षड्भेदा भवन्ति। १ कौथुमाः, २. आसुरायणाः, ३. वातायनाः ४. प्रांजलैर्वैनभृतः, ५. प्राचीनयोग्याः, ६. नैगमीया इति। तेषां कौथुमादीनां अध्ययनम्। अशीतिशतमाग्नेयं पावमानं चतुःशतम्। ऐंद्रं तु षड्विंशतिर्यानि गायन्ति सामगाः। तान्यधीत्य चण्डात्प्रचण्डतरो भवति। शिष्टान्यधीत्य शिष्टात्रिंशतिको भवति। तत्र केचित् ऋक्तंत्रं सामतंत्रं संज्ञा धातुलक्षणमिति विधीयन्ते। अष्टौ सामसहस्राणि सामानि च चतुर्दश। अष्टौ शतानि नवति दशतिर्वालखिल्यकम्। सरहस्यं ससुपर्णप्रेक्ष्यं तत् सामदर्पणम्। सारण्यकानि सौर्याण्येतत्सामगणं स्मृतम् ॥ २ ॥

भाष्यः—अशीतिशतं आग्नेयं १८०, पावमानं चतुःशतं १०४, ऐन्द्रन्तु २६ षड्विंशति, यानि गायन्ति सामगाः तानि

सूक्तान्यधीत्य चण्डादुत्कृष्टात् ते चण्डतरा अत्युत्कृष्टा भवन्ति शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टाऽऽविंशतिको भवति। शिष्टान् प्रामाणिकान् आविंशाति शिष्टेषु वा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूरकाः सर्वश्रेष्ठो भवतीत्यर्थः। तत्र सूक्तेषु केचित् मंत्रतंत्रा इति मंत्राश्चतुर्धा विधीयन्ते। तदाहाचार्यः ऋक्तंत्रं, सामतंत्रं संज्ञालक्षणं, धातुलक्षणमिति। इदानीं सामसंख्यामाह। " अष्टौ सामसहस्राणि " इत्यस्यार्थो अंकतो ज्ञातव्य ८८१४।

भाष्यार्थः--८८१४ साममंत्र, याशिवाय अन्य सुपर्णप्रेक्ष्य व वालाखिल्य मिळून १७० मंत्र आहेत. दुसऱ्या प्रकारें राणायनीयाचे ७ भेद. त्यांचीं नांवें--१. राणायनीय, २. सात्यमुग्र, ३. कालेय, ४. महाकालेय, ५. लांगल, ६. शार्दूल, ७. कौथुम; त्यांत पुन्हां कौथुमशाखेचे सहा भेद. त्यांचीं नांवें १. कौथुम, २. आसुरायणीय, ३. वातायन, ४. प्रांजल-वैनभृत, ५. प्राचीनयोग्य व ६. नैगमीय. त्या कौथुमादि शाखांचें अध्ययन १८० अग्निसूक्तें, १०४ पवमानसूक्तें, २६ इंद्रसूक्तें. या सर्वांना सामगण अशी संज्ञा आहे. त्या सूक्तांचें अध्ययन करणारे अत्युत्कृष्ट होतात. याहून निराळ्या शिल्लक राहिलेल्या सूक्तांचें अध्ययन करणारा शिष्टाऽऽविंशतिक म्हणजे सर्वश्रेष्ठ होतो. त्या पूर्वोक्त सूक्तांत कांहीं मंत्रतंत्र आहेत. त्यांचे प्रकार--१. ऋक्तंत्र, २. सामतंत्र, ३. संज्ञालक्षण, ४. धातुलक्षण. आतां सामसंख्या सांगतों.

भाष्यः--अन्यशाखासंख्यामाह 'नवतीति' सुपर्णप्रेक्ष्यः कश्चित् शाखाभेदः तेन सहवर्तमानः ससुपर्णप्रेक्ष्यः सुपर्णप्रेक्ष्येण सहितः वालखिल्यः शाखाभेदो नवतिः नवतिसंख्याकाः दशतयः यस्मिन् स नवति दशातिः॥ दशतिरिति दशसंख्या-संज्ञा। दश-गुणानवतिरित्यर्थः अङ्कतः अपि ९००। 'सारण्यकानि, आरण्य-

केनोपनिषद्भागेन सह वर्तमानानि सौर्याणि सूर्यदैवत्यानि सूक्तानि। तत्र वालखिल्यशाखायामेव आरण्यकं सूर्यसूक्तं सुपर्णप्रेक्षवालखिल्यसूक्तानि मिलित्वा नवशतानीत्यर्थः। निगमयति एतत्पूर्वोक्तसामसमूहैः स्मृतं कथितम्। गणशब्दस्य क्लीबत्वं छांदसम्। आसां षोडशशाखानां मध्ये तिस्रः शाखा विद्यन्ते। तासु गुर्जरदेशे कौथुमी प्रसिद्धा। कर्णाटके जैमिनी प्रसिद्धा। महाराष्ट्रदेशे राणायनी प्रसिद्धा। अष्टौ सामसहस्राणि छंदोगार्चिकसंहिता। गानान्नि तस्य वक्ष्यामि सहस्राणि चतुर्दश ॥ १ ॥ अष्टौ शतानि ज्ञेयानि दशोत्तरस्तथैव च। ब्राह्मणं चोपनिषदं सहस्त्रित्रितयं तथा ॥ २ ॥ आसां शाखानामध्यापकाचार्यास्त्रयोदशसंख्याकाः। ते यथा—

भाष्यार्थः--अन्य शाखेची अध्ययनसंख्या सांगतों. सुपर्णप्रेक्ष्य म्हणून एक शाखाभेद आहे. त्यासह वालखिल्यशाखाभेदाच्या मंत्रांची संख्या 'नवतिदशति ९००' होय. नवति म्हणजे नव्वद ९०, दशति म्हणजे दशकड्या आहेत. ज्यामध्यें ती नवतिदशति ९०० होय; किंवा दुसरा अर्थ 'दशति' ही दहा संख्येची संज्ञा आहे. म्हणून दहा या संख्येनें गुणलेली नवति म्हणजे नव्वद ही संख्या म्हणजे ९०० होय. "सारण्यकानि सौर्याणि" यांचा अर्थ आरण्यक म्हणजे उपनिषद्भाग. त्यासह सौर्याणि म्हणजे सूर्यदेवताक सूक्तें. (सुपर्णप्रेक्ष्य व वालखिल्य या दोन शाखांपैकीं वालखिल्यशाखेंतच आरण्यक म्हणजे उपनिषद्भाग व सूर्यसूक्तें आहेत.) तात्पर्य, सुपर्णप्रेक्ष्य आणि वालखिल्य मिळून ९०० ही संख्या आहे. हा पूर्वीं सांगितलेला सामसमूह आहे असें म्हटलें आहे. गण शब्दाचें (गणं) असें नपुंसकरूप वैदिक आहे असें समजावें. वरील सामवेदाच्या सोळा शाखांपैकीं तीनच विद्यमान आहेत. गुजराथेंत कौथुमी, कर्नाटकांत जैमिनी, महाराष्ट्रदेशांत राणायणी. या शाखांचें अध्ययन आर्चिकसंहिता ८००० मंत्र त्यांचे सामगानमंत्र १४८१० आणि ब्राह्मणउपनिषद्भाग मिळून ३००० ग्रंथसंख्या आहे. या शाखांचे अध्यापकाचार्य तेरा आहेत. ते असे--

भाष्यः—राणायनी सात्यमुग्री दुर्वासा अथ भागुरिः। भारुंडो गौर्गुजवीर्भगवानौपमन्यवः ॥ १ ॥ दारालो गार्ग्यसावर्णी वार्षगण्यश्च ते दश। कुथुमिः शालिहोत्रश्च जैमिनिश्च त्रयोदश ॥ २ ॥ इत्येते सामगाचार्याः स्वति कुर्वन्ति तर्पिताः ॥ इति।

भाष्यार्थः--१. राणायनी, २. सात्यमुग्री, ३. दुर्वासा, ४. भागुरि, ५. भारुंडि, ६. गौर्गुजवी, ७. भगवानौपमन्यु, ८. दाराल, ९. गार्ग्यसावर्णि, १०. वार्षगण्य, ११. कुथुमी, १२. शालिहोत्र, १३. जैमिनि. ह्यांचें ब्रह्मयज्ञांत तर्पण केलें असतां ते संतुष्ट होऊन कल्याण करतात.

भाष्यः—अन्येऽपि भागवतद्वादशस्कंधसप्तमाध्याये पञ्चसप्ततिपद्यमारभ्य अध्यायसमाप्तिपर्यन्तोक्ताः सामवेदप्रवर्तकास्ते यथा। जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनेः। सुमन्वांस्तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥७५॥ सुकर्मापि च तच्छिष्यः सामवेदतरोर्महान्। सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः ॥ ७६ ॥ हिरण्यनाभः कौसल्यः पौष्यंजिश्च सुकर्मणः। शिष्यौ जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः ॥ ७७ ॥ उदीच्याः सामगाः शिष्या आसन् पञ्चशतानि च। पौष्यंज्यावंत्ययोश्चापि तांश्चोदीच्यान् प्रचक्षते ॥ ७८ ॥ लौगाक्षिर्लांगलिः कुल्यः कुशीदः कुक्षिरेव च। पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतम् ॥७९॥ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः। शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ॥ ८० ॥ भागवत द्वादश स्कं. अ. ७. अस्यार्थः सामगस्य जैमिनेः पुत्रः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वान् नाम सुमन्तु-सुमन्वभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह। (७५) सुकर्माऽपि जैमिनेः शिष्यो महानति प्रज्ञावान् सामवेदाख्यतराः साम्नां सहस्रसंहितारूपं भेदं चक्रे। (७६) कोसलपुत्रः हिरण्यनाभश्च पौष्यंजिश्च सुकर्मणः शिष्यौ सामशाखां जगृहतुः। अन्यः आवंत्यः उदीच्यश्च साम्नां शाखां जगृहतुः ॥ पौष्यंज्यावन्त्ययो-

अपि सामगाः पञ्चशतानि शिष्या आसन् । (७७।७८) तेषां समुदितानां नामानि लौगाक्षिरित्यादीनि । पौष्यञ्जिशिष्या लौगाक्ष्यादयो साम्नां शतं शतं संहिता जगृहुः । हिरण्यनाभस्य शिष्यो नाम्ना कृतश्च चतुर्विंशति संहिताः स्वशिष्येभ्य ऊचे । शेषा अन्याः संहिता आत्मवानवानावन्त्यः स्वशिष्येभ्यः ऊचे इत्यर्थः ॥ व्याख्या चरणव्यूहस्य सामखण्डस्य वै मया । विस्तारिता यथाबुद्धि महादेवप्रसादतः । इति चरणव्यूहे तृतीयखण्डव्याख्या समाप्ता । इति तृतीयः सामखण्डः समाप्तः ।

भाष्यार्थः--दुसरेही सामवेदप्रवर्तक आचार्य भागवत द्वादशस्कंध अध्याय सातमध्यें ७५ श्लोकापासून अध्यायसमाप्तिपर्यंत सांगितलेले आहेत. ते असे – सामगायक जैमिनी. त्याचा पुत्र सुमन्तु, त्या सुमन्तूचा पुत्र सुमन्वान्. या दोन पुत्रपौत्रांनीं क्रमानें एक एक संहिता घेतली. त्या जैमिनीचा अतिबुद्धिमान् शिष्य सुकर्मा यानें सामवेदवृक्षाच्या सामांचे १००० भेद केले. सुकर्माचे शिष्य दोन. कोसलपुत्र हिरण्यनाभ आणि पौष्यंजि. ह्यांनीं त्या सामशाखेचा अभ्यास केला. दुसरा आवन्त्य व उदीच्य यांनींही त्या सामशाखा घेतल्या. आवन्त्य व पौष्यंजि ह्यांचे ५०० शिष्य होते. पौष्यंजीच्या शिष्यांत लौगाक्ष्यादिक (लौगाक्षि, लांगल, कुल्य, कुमीद व कुक्षि) शिष्यांनीं प्रत्येकीं १००–१०० संहितांचा अभ्यास केला. हिरण्यनाभशिष्य कृत नांवाचा होता. त्यानें आपल्या शिष्यांना २४ संहिता पढविल्या. उरलेल्या सामवेदाच्या दुसऱ्या संहिता आवन्त्यानें आपल्या इतर शिष्यांना शिकविल्या.

याप्रमाणें चरणव्यूहांतील तिसऱ्या खंडाचें व्याख्येसह भाषांतर समाप्त झालें.

॥ चरणव्यूहचतुर्थखण्डः ॥

॥ अथर्ववेदवर्णनम् ॥

मूलसूत्रः— अथर्ववेदस्येति— ' अथर्ववेदस्य नव भेदा भवन्ति, नव शाखा भवन्तीत्यर्थः । पैप्पला, दान्ता, प्रदान्ता, औता, जाबाला, शौनका, ब्रह्मपलाशा, कुनखीवेददर्शी, चारणविद्याश्चेति ।

भाष्यः— तानाह पैप्पला, दान्ता, प्रदान्ता, औता, जाबाला, शौनका, ब्रह्मपलाशा, कुनखीवेददर्शी चारणविद्याश्चेति ।

मूलसूत्रः— ' तेषामध्ययनं, (द्वादशैव सहस्राणि) पञ्चकल्पानि भवन्ति, कल्पे कल्पे पञ्चशतानि भवन्ति । नक्षत्रकल्पो, विधानकल्पो विधिविधानकल्पः संहिताकल्पः शांतिकल्पश्चेति ।

भाष्यः— तेषामध्ययनं द्वादशैव सहस्राणि मंत्राणाम् । कीदृशानि पञ्चकल्पानि भवन्ति । यत्र बहुवचनं ते बहवः । यत्र एकवचनं स एकः । तेषामध्ययनं शाखया उच्यते । द्वादशसहस्राणि मंत्राणां कीदृशानि । एकस्मिन् कल्पे कल्पे पञ्चशतानि मंत्राणाम् । कल्पानाह—नक्षत्रकल्पः विधानकल्पः विधिविधानकल्पः संहिताकल्पः शांतिकल्पः । इति पञ्च कल्पाः ।

भाष्यार्थः—अथर्ववेदाचे नवभेद म्हणजे नवशाखा आहेत. त्यांचीं नांवें मूळांत व भाष्यांत स्पष्टच आहेत. त्यांचें अध्ययन १२००० मंत्र

आणि पांच कल्प आहेत. प्रत्येक कल्पांत ५०० मंत्र आहेत. कल्पांची नांव—१. नक्षत्रकल्प, २. विधानकल्प, ३. विधिविधानकल्प, ४. संहिताकल्प व ५. शांतिकल्प.

मूलसूत्रः—सर्वेषामेव वेदानां उपवेदा भवन्ति । ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान् व्यासः स्कंदो वा ।

भाष्यः— तत्र वेदानां चत्वार उपवेदा भवन्ति । यथा ऋग्वेदस्योपवेद आयुर्वेदः चिकित्साशास्त्रम् । यजुर्वेदस्योपवेदो धनुर्वेदो युद्धशास्त्रम् । सामवेदस्योपवेदो गान्धर्ववेदः सङ्गीतशास्त्रम् । अथर्ववेदस्यार्थशास्त्रं नीतिशास्त्रं, शस्त्रशास्त्रं, विश्वकर्मादिप्रणीतशिल्पशास्त्रम् । इति भगवान् व्यासः स्कंदः कुमारोवाऽह ।

भाष्यार्थः सर्वच वेदांचे उपवेद आहेत. ऋग्वेदाचा उपवेद आयुर्वेद म्हणजे चिकित्साशास्त्र, यजुर्वेदाचा उपवेद धनुर्वेद म्हणजे युद्धशास्त्र. सामवेदाचा उपवेद गान्धर्ववेद म्हणजे गायनशास्त्र. अथर्ववेदाचा उपवेद अर्थशास्त्र, नीतिशास्त्र, शस्त्रशास्त्र व विश्वकर्म्यानें रचलेलें शिल्पशास्त्र हे होत. याप्रमाणें भगवान् वेदव्यास किंवा कुमार (कार्तिकेय) यानें सांगितलें आहे.

मूलसूत्र—य इमे चत्वारस्तेषां एकैकस्य कीदृशं रूपं वर्णविधोच्यते ।

भाष्यः— य इमे चत्वारो वेदा उक्ताः तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः तत्तद्वर्ण सितासितादि विधा प्रकारश्चोच्यते ।

अर्थः—वर जे चार वेद सांगितले त्यांपैकीं एकेकाचें स्वरूप, आकार, वर्ण, विधा म्हणजे प्रकार कसा आहे तो सांगतों (ह्यापुढें सर्व गोष्टी उपासनेसाठीं सांगितल्या आहेत.)

मूलसूत्र— ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्तितं प्रमाणं तावत्तिष्ठान्वितस्तीः पञ्च-यजुर्वेदः पिंगाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रः षड्दीर्घत्वेन, सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रःअथर्ववेदस्तीक्ष्णः प्रचण्डः कामरूपी विश्वकर्ता क्षुद्रकर्मा स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्रः ।

भाष्यः— तत्रादौ ऋग्वेदः पद्मपत्राक्षः पद्मपत्रं कमलदलं तद्वद्दक्षिणी नेत्रे यस्य सः। सुविभक्तग्रीवः रेखात्रयांकिता ग्रीवा यस्य सः। कुञ्चितकेशश्मश्रुः कुञ्चिता वलीमन्तः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य सः। श्वेतवर्णो वर्णेन। श्वेतः वर्णो यस्य सः। कीर्तितं प्रमाणं तावत्तिष्ठन्वितस्तयः पञ्च साकल्येन पञ्चवितस्तयो भवन्ति । ह्येतत्प्रमाणमृग्वेदस्य कीर्तितमुक्तम् वितस्तिशब्दो द्वादशांगुलात्मकः। सार्धहस्तद्वयप्रमाणमित्यर्थः ॥

भाष्यार्थः— ऋग्वेदाचें स्वरूप सांगतों. कमलासारखे डोळे, तीन रेखायुक्त मान, कुरळे केंस व श्मश्रु, श्वेतवर्ण म्हणजे पांढराशुभ्र वर्ण, पांच वीति देहाची उंची. (१२ अंगुलें म्हणजे वीत हें प्रमाण धरून मोजलें तर उंचीचें प्रमाण अडीच हात असा तात्पर्यार्थ.)

भाष्य:— यजुर्वेदस्वरूपमाह-यजुर्वेदः पिङ्गाक्षः, पिङ्गे पीते अक्षिणी यस्य सः। कृशमध्यस्थूलगलकपोलः कृशं मध्ये कटिप्रदेशो यस्य सः। स्थूलौ गलकपोलौ यस्य सः। ताम्रवर्णः ताम्रवत् आचरितो रक्तो वर्णो यस्य सः। यद्वा कृष्णो वर्णो यस्य सः। दीर्घत्वेनोच्चत्वेन षट् प्रादेशमात्रं प्रमाणं यस्य सः। प्रादेशस्तु प्रदेशिन्या इत्यभिधानोक्तेः। अंगुष्ठप्रदेशिन्योर्विहितत्वात् प्रमाण-प्रादेशाः दशांगुलः। तादृशाः षट् प्रादेश : प्रमाणं षष्ठ्यंगुलं सार्ध-हस्तद्वयमित्यर्थः॥ सामवेदस्वरूपमाह-सामवेदो नित्यं स्रग्वी स्रजो माला यस्य सन्तीति स्रग्वी। 'अस्मायामेधास्रजो विनिः' (अष्टा० ५ पा. २ सू. १२१) इति सूत्राद्विनिप्रत्ययः। नित्यं पुष्पमालाधारी। 'सुप्रयतः' यमनियमवान्। 'शुचिवासाः' शुचि शुद्धं वासो वस्त्रं यस्य सः शुद्धवस्त्रधारी। शमः शांतिरस्यास्तीति शमी शांतमनाः। दान्तो नियतबाह्येन्द्रियः। बृहन्महच्छरीरं यस्य सः। शमीतरोर्दंडो यस्य सः शमीदण्डी। कातरेऽल्पे अक्षिणी द्वे नेत्रे यस्य सः। काञ्चननयनो वा। आदित्यस्य भानोर्वर्ण इव वर्णो यस्य सः। श्वेतवर्णो वा। नवारत्निप्रमाणं यस्य सः। सार्धचतुष्टयहस्त-दीर्घः इत्यर्थः। अथर्ववेदस्वरूपमाह— तीक्ष्णः उग्रः। प्रचण्डः क्रोधी। कामरूपी कामेन रूपाणि यस्य सः स्वेच्छारूपधारी। विश्वस्य आत्मा जीवनम्। विश्वस्य कर्ता स्रष्टा च उपनिषद्बाहुल्यात्। क्षुद्र-कर्मा क्षुद्राणि कर्माणि यस्य सः अभिचारकृत्याप्रयोजकमंत्रबाहु-ल्यात्। स्वशाखाध्यायी अथर्वणि विशेषः प्राज्ञश्च। महानीलोत्पल-वर्णो वर्णेन श्यामकमलमिव वर्णो यस्य स श्यामसुंदरः। दश अर-त्नयः अकनिष्ठिकहस्ताः प्रमाणं यस्य पञ्चहस्तप्रमाण इत्यर्थः।

भाष्यार्थः–यजुर्वेदाचें स्वरूप सांगतो. घारे डोळे, मध्यभाग कृश, गळा व गाल मोठे (स्थूल) लाल रंग किंवा काळा रंग (यजुर्वेदाचे शुक्ल व कृष्ण असे दोन भेद मानले आहेत त्यामुळें) उंची सहा प्रादेश. प्रादेश म्हणजे दहा अंगुलें. तसे सहा प्रादेश म्हणजे ६० अंगुलें म्हणजे अडीच हात समजावी.

अंगठा व तर्जनी जमिनीवर पसरले असतां त्यांच्यामधील अंतरास प्रादेश अशी पारिभाषिक संज्ञा आहे. वरील अंतर १० अंगुलें असतें.

सामवेदाचें स्वरूप सांगतों. सामवेद नित्यपुष्पमालाधारी, यमनियम आचरणारा, शुद्ध वस्त्र परिधान करणारा. शांत मनाचा, बाह्येंद्रियनिग्रही, स्थूलशरीरी, शमीवृक्षाचा दण्ड ज्याच्या हातांत आहे असा, सुवर्णाप्रमाण डोळे आहेत ज्याचे असा, शुभ्रवर्णी अथवा सूर्याच्या वर्णाप्रमाणें ज्याचा वर्ण आहे असा, उंची नवारत्नि म्हणजे साडेचार हात.

अथर्ववेदाचें स्वरूप सांगतों. उग्र, रागीट, स्वेच्छारूपधारी, विश्वाचें जीवन, विश्वाची उत्पत्ति करणारा, हलकट कामें करणारा, (कारण या वेदांत अभिचारकृत्याचे म्हणजे जारणमारणउच्चाटन' इत्यादि मंत्र पुष्कळ आहेत.) स्वशाखेचें अध्ययन करणारा, प्राज्ञ व नीलकमलाप्रमाणें ज्याचा वर्ण आहे म्हणजे श्यामसुंदर. उंची दहा अरत्नि म्हणजे पांच हात.

भाष्यः— अथ वेदानां गोत्रदेवताछंदांस्याह— ऋग्वेदस्य आत्रेयसगोत्रम् । आत्रेयाः सगोत्राः समानगोत्रा यस्य तत् । अत्रिगोत्र ऋग्वेद इत्यर्थः । सोमदैवत्यं सोमः देवता यस्य तत् । गायत्री छंदो यस्य तत् । एवं अग्रेऽपि व्याख्यातव्यम् । अथ यजुर्वेदस्य काश्यपगोत्रं इंद्रदैवत्यं त्रिष्टुप् छंदः । अथ सामवेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं जगतीछंदः । अथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यं अनुष्टुप् छंदः ॥ १ ॥ इति चरणव्यूहे चतुर्थखण्डव्याख्या समाप्ता ॥ इति चतुर्थः अथर्ववेदखण्डः समाप्तः ॥

भाष्यार्थः—प्रत्येक वेदाचें गोत्र, देवता व छंद सांगतों. १. ऋग्वेद, अग्निगोत्र, सोमदेवता, गायत्रीछंद. २. यजुर्वेद--काश्यपगोत्र, इंद्रदेवता, त्रिष्टुप्छंद, ३. सामवेद--भारद्वाजगोत्र, रुद्रदेवता, जगतीछंद. ४. अथर्ववेद--वैतानस (बैजान) गोत्र; ब्रह्मादेवता, अनुष्टुप्छंद. याप्रमाणें चरणव्यूहग्रंथांतील चवथ्या खण्डाचें भाष्यासह भाषांतर पूर्ण झालें.

॥ फलस्तुतिखण्डः पञ्चमखण्डः ॥

मूलः— य इदं वेदानां नामरूपगोत्रप्रमाणच्छंन्दोदैवत-वर्णं वर्णयति । अविद्यो लभते विद्यां जातिस्मरोऽथ जायते जन्म जन्म वेदपारगो भवत्यव्रती व्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति । नमः शौनकाय नमः शौनकाय ॥

भाष्यः—अथ चतुर्वेदस्य फलस्तुतिमाह— य इदमिति । यः पुमानिदं वेदानां नाम रूपं गोत्रं प्रमाणं छंदो दैवत्यं वर्णं वर्णयति ॥ नामादीनां द्वंद्वैकवद्भावः १ नाम ऋग्वेदादि २ रूपं पद्मपत्राक्षादि ३ गोत्रमात्रेयादि ४ प्रमाणं पञ्चवितस्त्यादि ५ छंदो गायत्र्यादि ६ दैवत्यं सोमादि ७ वर्णं श्वेतादि च इत्यादि यो जानाति सः अविद्यो विद्याहीनः सन् विद्यां लभते प्राप्नोति । 'जातिस्मरोऽथ जायते' अथ जन्मान्तरे उत्तमजातिर्जायते पूर्वजातिं स्मरति जन्म जन्म प्रतिजन्मनि वेदपारगः वेदपाठी भवति 'अव्रती व्रती भवति' व्रतहीनोऽपि व्रतवान् भवति । ब्रह्मचर्यहीनो ब्रह्मचर्यफलं प्राप्नोति। शौनकाचार्याय नमः । इति पदावृत्तिर्ग्रंथसमाप्त्यर्थम् ।

भाष्यार्थः—जो पुरुष वेदांचीं ऋग्वेद इत्यादि नांवें, कमलनेत्र इत्यादि रूप, आत्रेयादि गोत्र, पांच वीति इत्यादि प्रमाण, गायत्री इत्यादि छंद, सोम इत्यादि देवता, श्वेतादि वर्ण यांचें वर्णन करतो म्हणजे जाणतो तो विद्याहीन असला तरी त्याला विद्या मिळते. दुसऱ्या जन्मांत उत्तम जन्म घेऊन पूर्वजन्माला स्मरतो म्हणजे त्याला पूर्वजन्म आठवतो. प्रत्येक जन्मांत वेदपाठी होतो. व्रताचरण न करतां व्रताचें फळ मिळवितो. ब्रह्म-

चर्य न राखतां ब्रह्मचारीपणाचें फळ मिळवितो. ग्रंथकर्त्यानें " नमः शौनकाय " असें दोनदां म्हटलें आहे तें ग्रंथसमाप्ति झाली हें सांगण्याकरितां आहे.

मूलः—य इदं चरणव्यूहं गर्भिणीं श्रावयेत् स्त्रियम् ॥
पुमांसं जायते पुत्रमृषिभिर्वेदपारगम् ॥ १ ॥
य इदं चरणव्यूहं श्राद्धकाले पठेद्विजः ।
अक्षय्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते ॥ २ ॥
य इदं चरणव्यूहं पठेत्स पंक्तिपावनः ।
तारयेत् प्रभृतीन् पुत्रात् पुरुषान् सप्त सप्त च ॥ ३ ॥
य इदं चरणव्यूहं पठेत् पर्वसु पर्वसु ।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय गच्छति ॥ ४ ॥
यो नामानि पुरा वदे अमृतत्वं च गच्छति ।
लोकातीतं महाशान्तममृतत्वं च गच्छति ॥ ५ ॥
ॐ नम इत्याह भगवान् पाराशर्यः ॐ परमऋषिभ्यो नमः ॥
तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं चर्माम्बरं सुरमुनींद्रनुतं कवीन्द्रम् ।
कृष्णात्विषं कनकपिंगजटाकलापं व्यासं नमामि शिरसा
तिलकं मुनीनाम् ॥ १ ॥

॥ इति चरणव्यूहे पञ्चमखण्डः ॥ वासुदेवार्पणमस्तु ॥

भाष्यः— श्रवण-पठनफलमाह-य यदमिति । यः पुमान् इदं चरणव्यूहं गर्भिणी स्त्रियं श्रावयेत् सा स्त्री पुमांसं पुरुषलक्षणोपेतं पुत्रं जनयेत् । यः द्विजः श्राद्धकाले इदं चरणव्यूहं पठेत् तच्छ्राद्धं पितृन् प्राप्नोति तर्पयतीत्यर्थः । य इदं चरणव्यूहं प्रत्यहं पठेत्स

पंक्तिपावनो भवति। यस्यां पंक्तौ स द्विज आस्ते तां सर्वां पङ्क्तिं पावयतीत्यर्थः। स च पुत्रात्प्रभृतीन् पुत्रादिकान् सप्त सप्त च पित्रादींश्च आत्मानं चैव पञ्चदशपुरुषान् तारयति। य इदं पर्वसु पर्वसु अष्टमीभूतदर्शपौर्णमासी संक्रान्तिषु च पठति स धूतपाप्मा (धूतो दूरीकृतो पाप्मा पापं येन सः) सः स्वर्गवासी शुचिः पवित्रः सन् ब्रह्मभावाय गच्छति। " कर्मणि च " इति चतुर्थी। ब्रह्मभावं प्राप्नोतीत्यर्थः। इति चरणव्यूहपञ्चमखण्डव्याख्या समाप्ता॥ इति पञ्चमः फलश्रुतिखण्डः समाप्तः॥

त्रिदशांगधरामितेगतेऽब्दे मधुमासे दशमीतिथौ सुधांशौ। महिदासबुधः परोपकृत्यै चरणव्यूहमिदं व्यकारि काश्याम्॥ १॥ विद्वद्भिः प्रार्थितेनेयं महिदासद्विजन्मना। चरणव्यूहविवृत्तिर्विधिना तु मया कृता॥ २॥

भाष्यार्थः—जो पुरुष हें चरणव्यूह गरोदर स्त्रीला ऐकवितो ती स्त्री पुरुषलक्षणांनीं युक्त अशा पुत्राला जन्म देते. जो ब्राह्मण श्राद्धसमयीं याचा पाठ करतो त्याचें तें श्राद्ध पितरांना पोंचतें म्हणजे पितरांची तृप्ति करतें. जो दररोज हें म्हणतो तो पंक्तिपावन होतो म्हणजे तो ज्या पंक्तींत असतो त्या सर्व पंक्तीला पवित्र करतो. एवढेंच नव्हे तर पुत्रापासून पुढील सात पिढ्या व आपल्या मागच्या पूर्वजांच्या ७ पिढ्या व आपली स्वतःची पिढी अशा १५ पिढ्यांना पवित्र करतो. जो हें चरणव्यूह अष्टमी, चतुर्दशी, अमावास्या, पौर्णिमा व संक्रांति या प्रत्येक पर्वाचे दिवशीं म्हणतो तो निष्पाप होऊन स्वर्गांत राहून पवित्र होत्साता ब्रह्मभावाला प्राप्त होतो म्हणजे मोक्ष मिळवितो.

वेदशास्त्राभ्यासानें ज्याची बुद्धि शुद्ध झाली आहे असा चर्माम्बरधारी कविश्रेष्ठ, देव, मुनी व इंद्र यांनीं ज्याची स्तुति केली आहे असा, कृष्णकान्ति, पिंगटवर्ण जटाकला आहे ज्याचा असा जो व्यास त्यांना मी

नमस्कार करतो. ही चरणव्यूहाच्या पांचव्या खण्डाची व्याख्या समाप्त झाली.

हें चरणव्यूहभाष्य काशींत राहणाऱ्या मी महीदासपंडितानें विद्वज्जनांच्या प्रार्थनेवरून शास्त्रसंप्रदायाला अनुसरून शके १६१३ चैत्रमासीं दशमीतिथि सोमवार या दिवशीं परोपकारार्थ काशीक्षेत्रांतच लिहिलें. ॐ तत्सत् कृष्णार्पणमस्तु.

द्वितीयो भागः

जटावल्लिग्रन्थोक्तमालादिलक्षणकारिकाव्याख्या

मूलकारिकाः— ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोन्ततः।
अन्तं चादिं नयेदेवं क्रममालेति कीर्तिता ॥ १ ॥

विवरणम्:-- क्रमप्राप्तमालालक्षणमाह—

अर्धर्चस्य आदितः अन्तं यावत् क्रमं ब्रूयात्। अन्ततश्चादिं यावत् विपर्यासं ब्रूयात् एवं उक्तक्रमे सति क्रममाला भवतीत्यर्थः। कीर्तितेति पदेन अस्या अध्यनादित्वमुक्तम् ॥ प्रयोजनादि जटोक्ता पदशोधकत्वलक्षणमेव ज्ञातव्यम् ॥ यथा

स नः। भव सूपायनः। नः पितेव। सूपायनोऽग्ने। पितेव सूनवे पितेवेति पिताऽइव। अग्ने सूनवे। सूनवेऽग्ने। सूनवे पितेव। अग्ने सूपायनः। पितेव नः। सूपायनो भव। सूपायन इति सुऽउपायनः। भवेति भव। नः सः। सचस्वानः। स्वस्तये नः। नः स्वस्तये। स्वस्तय इति स्वस्तये। नः सचस्व ॥

अर्थः--अर्धर्चेच्या आरंभींच्या पदापासून अन्तापर्यंत म्हणजे शेवटच्या पदापावेतों क्रम म्हणून नंतर अन्तापासून आदिपदापर्यंत विपर्यास म्हणजे व्युत्क्रम म्हणावा. याप्रमाणें म्हटलें असतां क्रममाला ही विकृति होते. मूळ कारिकेंत जे "कीर्तिता" पद आहे त्यानें या विकृतीचें अनादित्व सांगितल आहे. प्रयोजन जटा या विकृतींत पदशोधकत्व हें जें सांगितलें आहे तेंच येथें समजावें. उदाहरणार्थ मुळांत दर्शविल्याप्रमाणें.

विवरणम्:— ननु दर्शपूर्णमासयोः इध्माबर्हिषोवत् आद्यन्तयोः प्रत्येकं क्रम विपर्याससंप्राप्तेः अयुक्तमुदाहरणं इति चेत् 'युवोरनाकौ' इतिवत् लक्षणशास्त्रत्वेन यथाक्रममन्वयात्। अन्यथा तत्रापि तथा स्यात्।

अर्थ:—शंका- दर्श व पूर्णमास या दोन्ही यागांत इध्मा व बर्हि या दोहोंची प्राप्ति आहे, त्याप्रमाणें या विकृतींत क्रम व विपर्यास हे दोन्ही आद्यन्तीं प्रत्येक पदास असले पाहिजेत; पण वर निर्दिष्ट केलेल्या उदाहरणांत आदिपदास क्रम व अन्त्य पदाला विपर्यास दाखविला आहे, म्हणून हें उदाहरण अयुक्त म्हणजे अयोग्य होय. या शंकेचें समाधान इध्माबर्हिषीप्रगाणें हें प्रयोगशास्त्र नसून "युवोरनाकौ" या सूत्राप्रमाणें लक्षणशास्त्र आहे म्हणून क्रम व विपर्यास यथाक्रम म्हणजे यथासंख्य करावयास पाहिजेत म्हणजे आदितः (पहिल्या पदापासून) क्रम, अन्ततः (शेवटच्या पदापासून) विपर्यास. असें न केलें तर वरील अष्टाध्यायीसूत्रांत अव व अक हे प्रत्यय यु आणि वु या दोन्हींना करण्याचाच प्रसंग येईल.

विवरणम्— विपर्यासे वेष्टनस्य प्रपाठशास्त्राभावात्। पितेवेत्यादिषु न तत् कार्यम्। अत एव जटायां संक्रमवेलायामेव कृतम्। क्रमधर्मत्वात्। अत एव विपर्यासेनार्धर्चसमाप्तावपि वेष्टनं न कार्यम्। क्रमधर्मयोगेन कदाचित् विपर्याससमाप्त्यनन्तरं समाप्तिः स्यात्। तत्राह अन्तं चादिं नयेत्-इति। अत्र यथोक्तक्रमेण क्रमं प्रथमत आरभ्य वेष्टनादि कृत्वा विपर्यासं तत आरभ्य क्रममन्त नीत्वान्त्यपदं वेष्टयित्वा पश्चात् विपर्यासं समापयेत्तत्तु न वेष्टयेदिति सकलस्य तात्पर्यम्। एतस्या विकृतेर्मालेत्येव नामधेयम्। जटामालेत्यत्रोद्देशावसरे तथैवोक्तत्वात्। अत्र क्रममालेति कथनम् एतस्याः क्रमपूर्वत्वप्रातिपादनार्थम्।

अर्थः—विपर्यासाच्या वेळां वेष्टन म्हणण्याचा प्रपाठशास्त्रांत अभाव आहे. यामुळें विपर्यासाचे समयीं 'पितेव' वगैरे पदांत वेष्टन म्हणूं नये. जटापाठाचे वेळीं क्रमधर्म म्हणूनच संक्रमाच्या वेळींच तें केलेलें असतें. करितां या विकृतींत विपर्यास म्हणत म्हणत अर्धर्चा समाप्त झाली तरी देखील शेवटच्या पदास वेष्टन घेऊं नये. कदाचित् क्रमधर्मसंबंधानें विपर्यास संपल्यावर समाप्ति होते असें कोणीं म्हटलें तर मूळकारिकेंत 'अन्तं चादिं नयेत्' असा स्पष्ट निर्देश आहे असें उत्तर द्यावें. तात्पर्य, या विकृतींत सांगितल्याप्रमाणें प्रथम पहिल्या पदाचा क्रम आरंभून पदाला वेष्टन असेल तर तेंही घ्यावें नंतर शेवटच्या पदापासून विपर्यास आरंभावा. याप्रमाणें प्रत्येक पदाचा क्रम अन्तापर्यंत नेऊन अन्त्य पदाला वेष्टन घ्यावें. मग विपर्यास संपवावा. विपर्यासाच्या पदास वेष्टन घेऊं नये. या विकृतीस 'माला' हेंच नांव आहे. 'जटा-माला' या उद्देश कारिकेंत 'माला' हाच शब्दप्रयोग आहे. येथें क्रममाला म्हणण्याचें कारण ही विकृति क्रमपूर्व आहे असें प्रतिपादन करण्यासाठीं समजावें.

विवरणम्— अमुमेवार्थं कुसुममालादृष्टान्तेनोपपादयति। माला मालेव पुष्पाणां पदानां ग्रथिनी हि सा। आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः॥ सा प्रसिद्धा माला यथा पुष्पाणां ग्रथिनी तथेयं पदानां ग्रथिनीत्यर्थः। अत एव ग्रंथिसाम्यात् मालेति समाख्यायते तस्यां क्रमव्युत्क्रमसंक्रमाणां आवृत्तिर्भवतीत्यस्य कोर्थः? प्रथमं क्रमःतदनन्तरं व्युत्क्रमः पुनश्च क्रमः। एवं प्रकारेण समग्र अर्धर्चेषु भिन्नेषु पदेषु आवर्तते न तु जटावत् एकत्र। नतु क्रमानर्थक्यं द्वयोरेवावृत्तत्वात्। अथवा क्रमः व्युत्क्रमः संक्रमः तेषां मेलनं तानि तस्यां आवर्तन्ते सन्ति आ निरर्थको निपातः। आ ईषद्वा एकदेशे मध्ये तानि भवन्ति इत्यर्थः। मेलनस्य मध्ये जायमानत्वात्। अतोपि सादृश्यम्।

अर्थः— हाच अर्थ कुसुममालादृष्टान्तानें स्पष्ट करतो. प्रसिद्ध अशी पुष्पमाला ही ज्याप्रमाणें फुलांना गुंफणारी असते त्याप्रमाणें ही पदांना गुंफणारी म्हणून ग्रंथिसाम्यामुळें हिलाहि माला असें नांव आहे. तीमध्यें क्रम, व्युत्क्रम व संक्रम या तीन प्रकारच्या संधींची आवृत्ति होते. याचा अर्थ प्रथम क्रम, नंतर व्युत्क्रम, पुनः क्रम याप्रमाणें संपूर्ण अर्धर्चेत हे भिन्न पदांत येतात. जटप्रमाणें हे तीन एकत्र येत नाहींत. या कारिकेंत क्रम, व्युत्क्रम व संक्रम असे तीन प्रकार आहेत; परंतु क्रमाला आनर्थक्य येऊं नये म्हणून दोहोंचीच आवृत्ति आहे. त्यामुळें संक्रम व्यर्थ होतो म्हणाल तर सांगतों 'आवर्तन्ते' या क्रियापदांत असलेला 'आ' हा निपात निरर्थक समजून 'वर्तन्ते' या क्रियापदाचा 'आहेत' एवढाच अर्थ घ्यावा किंवा आ म्हणजे ईषद् असा अर्थ करून क्रम, व्युत्क्रम, संक्रम या तीहींचा मेळ एकदेशांत म्हणजे अर्धर्चेच्यामध्यें कोठे तरी भिन्न पदांत होत असतो, म्हणूनच मालेचें सादृश्य समजावें.

मूलकारिका:— पदोत्तरां जटामेव शिखामार्याः प्रचक्षते॥

विवरणम्:— एकं पदं उत्तरं अधिकं यस्यां सा पदोत्तरा ताम्। जटापूर्त्यनंतरमेव पदं ग्राह्यम् अन्यथा तेन विपर्यासे जटात्वव्याघातात्। यथा उदा० १ सनो नः स सनः पितेव। २ नः पितेव पितेव नोनः पितेव सूनवे। ३ पितेव सूनवे सूनवे पितेव पितेव सूनवेऽग्ने पितेवेति पिताऽ इव इत्यादि द्रष्टव्यम्॥ अर्धर्चान्ते पदोत्तरजटा न संभवति इति कृत्वोत्तरार्धर्चस्य आद्यं पदं ग्राह्यमिति चेत् न, जटायां अर्धर्चेऽवसानस्यावश्यकत्वात्। क्रमे तु अर्धर्चेऽवसानस्य 'संधिर्नार्धर्चयोर्भवेत्' इत्यनेन प्राप्तत्वात्। शिखायां उत्तरपदग्रहणेऽपि 'पितरा पुनः पुनः पितरा पितरा पुनः सत्यमंत्रा' इत्यादौ पुनरित्यस्य पूर्वं वेष्टनं न भवति। किन्तु सत्यमंत्रा इत्यत्र पदोत्तरजटासिद्धौ भवति। वेष्टनस्य जटायामन्तर्भूतक्रमांगत्वेन प्राप्तत्वात्।

अत एव पदात् उत्तरा पदोत्तरेत्यर्थो न, सर्वपदानां जटाव्याप्तिर्न स्यात्। तत्श्चैकवारं पुनः पठिते पितरेत्यत आरभ्यैव आवर्तनीयम्। पुनरित्यत आरभ्योत्तरपदं आवर्तनीयम्। विकृतीनां पदशोधकत्व-लक्षणप्रयोजनानुरोधेन तत्पुरुषापेक्षया दुर्बलो बहुव्रीहिराश्रितः॥

अर्थ:--एकपद आहे उत्तर म्हणजे अधिक जिच्यामध्यें ती पदोत्तरजटा होय. तात्पर्य, जटा पूर्ण झाल्यावरच एक पद अधिक घ्यावें (असें न करतां दोन पदांचा क्रम झाल्यावर एक पद अधिक घेतलें तर व्युत्क्रमाचे वेळीं जटात्व नष्ट होईल.) म्हणजे श्रेष्ठ लोक तिला शिखा म्हणतात. उदाहरण मुळांत वर लिहिल्याप्रमाणें समजावें. यावर शंका अशी- अर्धर्चेच्या शेवटीं पदोत्तरजटा संभवनीय नाहीं म्हणून उत्तरार्धांतील पहिलें पद घ्यावें असे कोणी म्हणेल तर तें बरोबर नाहीं. कारण जटेंत अर्धर्चेवर अवसानाची आवश्यकता आहेच. क्रमकालीं तर ' संधिर्नार्धर्चयोर्भवेत् ' या प्रातिशाख्यावचनावरून अवसानाची प्राप्ति आहेच. शिखा या विकृतींत ' पितरा पुनः पुनः पितरा पितरा पुनः सत्यमंत्राः " या उदाहरणांत पुढील पदांचें ग्रहण झालें असलें तरी ' पुनः ' पदाला या ठिकाणींच वेष्टन नाहीं तर " पुनः सत्यमंत्रा " याची पदोत्तरजटा अर्थात् शिखा पूर्ण झाल्यावरच करावें. कारण जटेंतील अंतर्भूत जो क्रम त्याच्या अंगत्वानें वेष्टनाची प्राप्ति आहे. म्हणूनच पदात् उत्तरा पदोत्तरा असा अर्थ नाहीं. तसा केल्यास सर्व पदांना जटाव्याप्ति येत नाहीं. म्हणून एक वेळ ' पुनः पितरा ' येथून आरंभ करून शिखेची द्वयी म्हणावी. नंतर ' पुनः सत्यमंत्रा ' याची शिखा म्हणून ' पुनः ' यास वेष्टन घ्यावें. विकृतीचें पदशोधन हेंच प्रयोजन असल्यानें त्यास अनुसरून तत्पुरुषाच्या अपेक्षेनें दुर्बल अशा बहुव्रीहीचा आश्रय केलेला आहे.

लेखां लक्षयतिः-- मूलकारिकाः - क्रमाद्द्वित्रिचतुः पञ्च पदक्रममुदाहरेत। पृथक् पृथक् विपर्यस्य लेखामाहु पुनः क्रमात्॥

विवरणम्:— क्रमेण द्वित्रिचतुः पञ्चपदानां क्रममुदाहरेत् । तथैव एकैकं पृथक् पृथक् विपर्यस्य पुनस्तस्य तस्य क्रमलक्षणोक्तक्रमं कृतं चेत् एका लेखासंज्ञिका विकृतिर्भवति । एतदुक्तं भवति । आदौ द्विपदक्रमं पठित्वा तं विपर्यस्य पुनः क्रममुक्त्वा उक्तरीत्या त्रिपदमुक्त्वा तथैव विपर्यस्य तेषां त्रयाणां क्रमलक्षणेन क्रममुक्त्वा एवं चतुःक्रमपञ्चक्रमावुक्त्वा एका लेखा भवति । एवमेव पुनर्द्विपदादिक्रममारभ्य यथावसरं अध्यायादि समापनीयम् । तद्यथा–१ यदङ्ग । अंगयत् । यदङ्ग । अंगदाशुषेत्वम् । त्वं दाशुषेंग । अंगदाशुषे । दाशुषे त्वम् । दाशुषेत्वमग्नेभद्रं । भद्रमग्ने त्वं दाशुषे । दाशुषे त्वम् । त्वमग्ने । अग्ने भद्रम् । त्वमग्ने भद्रं करिष्यसि । करिष्यसि भद्रमग्नेत्वम् । त्वमग्ने । अग्ने भद्रम् । भद्रं करिष्यसि । अग्ने भद्रं करिष्यसि । करिष्यसि भद्रमग्ने । अग्ने भद्रम् । भद्रं करिष्यसि । भद्रं करिष्यसि । करिष्यसि भद्रम् । भद्रं करिष्यसि । करिष्यसीति करिष्यसि । तवेत्तत्सत्यमंगिरः । अंगिरः सत्यं तदित्तव । तवेत् । इत्तत् । तत्सत्यम् सत्यमंगिरः । अंगिर इत्यंगिरः ॥ इत्यादि

अर्थः— लेखेचें लक्षण सांगतों. क्रमानें दोन, तीन, चार व पांच पदांपर्यंत क्रम म्हणावा. त्या प्रत्येक द्विपदादि क्रमाचा वेगवेगळा विपर्यास (व्युत्क्रम) करून पुनश्च त्यांचा त्यांचा क्रमलक्षणोक्त क्रम म्हणावा. म्हणजे लेखा (रेखा) विकृति होते. या लक्षणावरून असें सांगितलें आहे कीं, आरंभीं दोन पदांचा क्रम त्याचा विपर्यास, व पुनः क्रम म्हणावा. नंतर तीन पदें, त्यांचा विपर्यास व पुनः क्रम. याचप्रमाणें चार पांच पदें म्हणून पुरीं झालीं म्हणजे एक लेखाविकृतीची द्वयी संपते. नंतर पुनः दुसऱ्या लेखेस दोन पदांच्या क्रमापासून अवसर असेल त्याप्रमाणें ऋचा, वर्ग, सूक्त व अभ्यास संपवावा. उदाहरणार्थ मुळांत दर्शविल्याप्रमाणें.

विवरणम्:-- ननु जटावत् ' यदङ्गाङ्गयद्यदङ्ग इति विलोमानुलोमयोः संधिः कुतोऽत्र नास्ति इति चेत् "विलोमे पदवत्सन्धिः इति यत् तस्य प्रमाणाभावात् । विवक्षितस्तु सन्धिर्भवति इति शास्त्रात्संधिमकृत्वैव पाठसम्प्रदायाच्च । क्रममुदाहरेत् इति विशेषवचनावसानस्यैव प्राप्तत्वाच्च ।

अर्थः—या विकृतींत जटेप्रमाणें विलोमानुलोम संधि कां नाहीं अशी शंका येईल म्हणून तिचें समाधान असें कीं, 'विलोमे पदवत् संधि' हें जें प्रमाण आहे त्या प्रमाणाचा येथें अभाव आहे. शिवाय " सा विवक्षामपेक्षते " या शास्त्राप्रमाणें संधि करणें वक्त्याच्या इच्छेवर असतें. तसेंच संधि न करतांच विकृति म्हणण्याचा शिष्टसंप्रदाय आहे आणि मूळलक्षणकारिकेंत " क्रममुदाहरेत " असें विशेषवचन असल्यामुळें अवसानाची प्राप्ति आहेच.

विवरणम्:-- न च पूर्वार्धे चतुःपदक्रमादिना समाप्ते तावतैव लेखासमाप्तिः नोत्तरार्धे पञ्चपदक्रम आरंभणीयः किन्तु द्विपदादिक्रममारभ्य लेखांतरं संपादनीय मालादिषु दर्शनात् इति वाच्यम् । तत्र " अर्धर्चस्यादितोन्ततः " इत्यर्धर्चग्रहणात् तथैव । इह तु तदग्रहणान्न पूर्वमेव समाप्तिः । शिखायां तदग्रहणे जटापदात् अर्धर्चसमाप्तिरित्युक्तम् । लेखायां ' पुनः क्रमात् ' इत्यनेनेव सिध्यति ।

अर्थः—प्रथम अर्धर्चेंत चार पदांचा क्रम होऊन लेखासमाप्ति होत नसेल तर येथेंच अर्धर्चेवर लेखा समाप्त करावी. उत्तरार्धर्चेंतील पदांनीं पंचपदक्रम आरंभूं नये तर द्विपदादि क्रम आरंभून दुसरी लेखा म्हणावी. कारण मालाविकृतींत अर्धर्चेवर समाप्ति दिसते अशी कोणी शंका घेईल तर त्या शंकेचें समाधान असें— ही शंका बरोबर नाहीं. कारण

मालाविकृतींत " अर्धर्चस्यादितोन्ततः " असा स्पष्ट उल्लेख आहे. येथें तर तसा उल्लेख नाहीं. म्हणून पूर्वअर्धर्चेवर समाप्ति करणें योग्य नाहीं. आतां शिखा या विकृतींतही अर्धर्चग्रहण नाहीं. करितां शिखेची अर्धर्चेवर समाप्ति होणार नाहीं अशी शंका घ्याल तर तिला उत्तर असें कीं, येथें ' जटा ' हें पद असल्यानें अर्धर्चेवर शिखेची समाप्ति आहे हें सिद्धच आहे. लेखालक्षणांत ' पुनः क्रमात् ' असा स्पष्ट निर्देश आहे म्हणून लेखेची अर्धर्चेवर समाप्ति होत नाहीं या म्हणण्याची सिद्धि होते.

विवरणम्:-- यत्र अर्धर्चे त्रिपदादि पठित्वा पदद्वयं शिष्टम् तत्र तत्पदद्वयं विपर्यस्य क्रमधर्मेण अर्धर्चं समाप्य उत्तरार्धर्चे पद-चतुष्टयादि आरंभणीयम्। तत्रापि पदचतुष्टयाभावे तावतैव विपर्यासादि कृत्वा यत्र पदचतुष्टयं लभ्यते तावत् गन्तव्यम्। तथा सति सर्वत्र लेखासत्वात् तस्याः पदशोधकत्वम्। अर्धर्चेऽवसानेन क्रमस्वरूपाबाधश्चेत्येतदुभयमनुगृहीतव्यम्। अन्यथा इतरत् बाध्येत ॥

अर्थः--लेखा-विकृति पठन करीत असतां ज्या अर्धर्चेंत तीन पदांचा क्रम व पृथक् विपर्यास म्हणून दोन पदेंच शिल्लक उरतात तेथें दोन पदांचा विपर्यास म्हणावा. नंतर क्रमधर्मानें क्रम म्हणून अर्धर्चा संपवावी व पुढच्या अर्धर्चेंतील चार पदें घेऊन लेखा आरंभावी. तेथेंही चार पदें नसतील तर जेवढीं पदें असतील तेवढ्याच पदांचे क्रमविपर्यास करून ज्या अर्धर्चेंत चार पदें मिळतील तेथपर्यंत जावें. असें केलें असतां सर्वत्र लेखाविकृतीचें अस्तित्व राहून तिला पदशोधकत्व येतें व अर्धर्चेवर अवसान घेणें ह्या क्रमस्वरूपाचा बाध होत नाहीं अशा दोन्हीं गोष्टी साधतात. असें न केलें तर क्रमस्वरूपाला बाध येतो.

विवरणम्:— ब्रूयाद्द्वित्रिचतुरित्यादिना यत्र त्रिक्रमादिकमस्ति तत्र द्विपदादिक्रमेणैव विपर्यासादि कृत्वा क्रमधर्मेण त्रिक्रमादिना वक्तव्यम् इति सिध्यति। तद्यथा। मोषुणः॥ मोषु सुमो मोषुणः मो इति मो स्विति सु इत्यादि क्रमोपमर्दकत्वे न कर्तव्यम्। द्विपदत्युपलक्षणम्। अन्यथा प्रधानीभूतं पदशोधनं बाध्येत इति।

अर्थः— द्विचतुः इत्यादिक वचनानें जेथें त्रिक्रमादिक आहे तेथें लेखाविकृतींत दोन, तीन या पदांच्या क्रमानेंच क्रमविपर्यासादि करून क्रमधर्माप्रमाणें त्रिक्रम, चतुःक्रम व पंचक्रम म्हणावा. उदाहरण- मोषुणः मोषु। सुमो ।मोषुणः। मो इति मो। स्विति सु इत्यादि क्रमाचा उपमर्द होऊं देतां कामा नये. " आदौ द्विपदं पठित्वा " हें उपलक्षण समजावें. नाहीं तर विकृतीचें मुख्य प्रजोजन (फल) जें पदशोधकत्व तें नष्ट होईल.

ध्वजमाह — मूलकारिका:— ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेद्यदि। वर्गे व ऋचि वा यत्र पठनं स ध्वजः स्मृतः॥

